ॐ

धार्मिक-सज्जनोपयोगिनी

पंडित-केशवभट्टज्योतिर्विदा

संस्कृता शोधिता च ।

इयम्

वटुकपूजा

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा प्राकाश्यं नीता ।

सप्तर्षिसंवत्सरे ५००३, विक्रमसंवत्सरे १९८४,
ईस्वीवत्सरे १९२७.

परोपकाराय प्रकाशिता ।

मूल्यं ॥) आनाष्टकम् ।

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Sthapan pooja

अथ वटुकपूजाविधिः।

तत्रादौ कलशस्थापनम् ॥ (पत्थरके चूर्णसे ईशानी कोणपर अष्टदल ब्रह्मकलश लिखके, अष्टदलपर अक्षोट और विष्टर युक्त पानी का घडा कलश रखके, उससे नैर्ऋतकोणपर प्रणीतपात्रभी रखके कलश को फी मंत्र फूल व अक्षत छोडना)॥ ॥ ॐकारो यस्य मूलं क्रमपदजठरच्छन्दविस्तीर्णशाखा ऋक्पत्रं सामपुष्पं यजुरुचितफलः स्यादथर्वः प्रतिष्ठा । यज्ञच्छायासुशीतो द्विजगणमधुपैर्गीयते यस्य नित्यं शक्तिः सन्ध्यात्रिकालं दुरितभयहरः पातु नो वेदवृक्षः॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् । गायत्रीं वरदाभयाङ्कुशकरां शूलं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥ आयातु वरदा देवी त्र्यक्षरा ब्रह्मवादिनी । गायत्री च्छन्दसांमातर्ब्रह्मयोने नमोस्तु ते ॥ २ ॥ भद्रं पश्येम प्रचरेम भद्रं भद्रं वदेम शृणुयाम भद्रम् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ "देवीनामेकेन्द्राणीवरुणान्याग्नायीनां द्यावापृथिव्यौ पार्थिवी षड्रुण्व्योऽतो देवा दैवी वा" ॥ अभि नो देवीरवसा महः शर्मणा नृपत्नीः, अच्छिन्नपत्राः सचन्ताम् ॥ इहेन्द्राणीमुपह्वये वारुणानीं स्वस्तये, अग्नायीं सोमपीतये॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्, पिपृतां नो भरीमभिः॥ तयोरिद्घृतवत्पयो विप्रा

८ शि० पू०

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

रिहन्ति धीतिभिः, गन्धर्वस्य ध्रुवे पदे ॥ स्योना पृथिवि भवा नृक्षरा निवेशनी, यच्छाऽनः शर्म सप्रथः ॥ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे, पृथिव्याः सप्तधामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः, अतो धर्माणि धारयन् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पृशे, इन्द्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते, विष्णोर्यत्परमं पदम् ॥ ॐगायत्र्यै नमः ॐभूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् । ३ । इति विष्णुभद्रम् ॥ (अब क्षेत्रपालों को अक्षत छोडना ॥ अश्वमेधे घोराणामार्षम् । ॐद्रष्ट्रेनम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमो नुकशात्रे नमः शृण्वते नम उपशृण्वते नमः सते नमोऽसते नमो जाताय नमो जनिष्यमानाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमः श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमः शान्ताय नमस्तपसे नमः । भूतं भव्यं भविष्यद्वषट्स्वाहा नम, ऋक्सामयजुर्वषट्स्वाहा नमो, गायत्री त्रिष्टुब्जगती वषट्स्वाहा नमः, पृथिव्यन्तरिक्षं द्यौर्वषट्स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट्स्वाहा नमः, पिता पुत्रः पौत्रो वषट्स्वाहा नमः, प्राणो व्यानोऽपानो वषट्स्वाहा नमो भूर्भुवः स्वर्वषट्स्वाहा नमः ॥ यो विश्वचक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां धमते संपतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामसि-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

त्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनुर्वोढाऽन-
ड्वानाशुः सप्तिर्जिष्णूरथेष्ठः पुरन्ध्रिर्योषा सभेयो युवाऽस्य यज-
मानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फल-
वतीर्न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ (और
कलशपर अक्षतपुष्प छोडना) । "इषे त्वोर्जे त्वेति ब्र-
ह्मणः" । इषे त्वोर्जे त्वा वायवः स्थो, पायवः स्थ देवो वः
सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे, आप्यायध्वमघ्न्या देवभागं
प्रजावतीरनमीवा अयक्ष्मा मावस्ते न ईशत माऽघशंसः, परि
वो रुद्रस्य हेतिर्वृणक्तु ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य
पशून्पाहि यजमानस्य पशुपा असि, देवस्य त्वा सवितुः प्र-
सवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे, गोपदसि प्रत्युष्टं
रक्षः प्रत्युष्टाऽरातिः प्रेयमागाद्धिषणा बर्हिरच्छ मनुना कृता,
स्वधया वितष्टा उर्वन्तरिक्षं वीहीन्द्रस्य परिपूतमसि माधो मो-
परि परस्त ऋद्ध्या, स मा च्छेता ते मा रिषत् देवबर्हिः श-
तवल्शं विरोह सहस्रवल्शं वियं रुहेम, आदित्या रास्नासी-
न्द्राण्याः सन्नहनं पूषा ते ग्रन्थिं ग्रथ्नातु स ते मा स्थादिन्द्रस्य
त्वा बाहुभ्यामुद्यच्छे बृहस्पतेस्त्वा मूर्ध्ना हरामि देवं गममसि
तदा हरन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे, वसोः
पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः
प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः, मधुमद्घृतव-
त्पिन्वमाना जीवा जीवन्तीरुप वः सदेम मातरिश्वानो घर्मोसि
द्यौरसि पृथिव्यसि विश्वधाया परेण, धाम्ना, हुतासि माह्वाः
सा विश्वायुः सा विश्वव्यचाः सा विश्वधाया हुतस्तोको हुतो

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

द्रप्सोऽग्नये वृहते नाकाय स्वाहा, द्यावापृथिवीभ्यां सपृच्छ्यध्वमृ-तावरी ऊर्मिणा मधुमत्तमा मान्द्राधानस्य सातयः, इन्द्रस्य त्वा भागं सोमेनातनच्म्यदस्तमसि विष्णवे विष्णो हव्यं रक्षस्वापो जागृत, महित्रीणां मवोस्तु द्युम्नं मित्रस्यार्यम्णः, दुराधर्षं वरु-णस्य, नहि तेषाममाचन नाध्वसु वरणेषु ईशे रिपुरघशंसः, यस्मै पुत्रासो अदितेः प्रजीवसे मर्त्याय ज्योतिर्यच्छन्त्यजस्रम्, सोमानं स्वरणं कृणुहि ब्रह्मणस्पते, कक्षीवन्तं य औपजो यो रेवाण्यो अमीवहा वसुवित्पुष्टिवर्धनः सनः सिषक्तु यस्तुरः, मा नः शंसो अररुषो धूर्तिः प्राणङ्मर्त्यस्य रक्षाणो ब्रह्मणस्पते ॥ (अब तिल अक्षत पुष्प पानी और विष्टरवाले प्रणीतपात्र में गन्ध और तीन मंत्रोंसे तीन फूल पाना) ॥ संवः सृजामि हृदयं संसृष्टं मनो अस्तु वः ॥ १ ॥ संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ॥ २ ॥ संप्रिया वः प्रियास्तन्वः संप्रिया हृदयानि वः । आत्मा वो अस्तु सं-प्रियः संप्रियास्तन्वो मम ॥ ३ ॥ (प्रणीतपात्र के विष्टर से कलश और क्षेत्रेशों को जीवाधान करना) ॥ अग्नेरा-युरसि तस्य ते मनुष्या आयुष्कृतस्तेनासा अमुष्मा आयुर्धेहि ॥ इन्द्रस्य प्राणः स ते प्राणन्ददातु यस्य प्राणस्तस्मै ते स्वाहा ॥ पितृणां प्राणास्ते ते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा ॥ मरुतां प्राणास्ते ते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा ॥ वि-श्वेषान्देवानां प्राणास्तेते प्राणन्ददतु येषां प्राणस्तेभ्यो वः स्वाहा॥ प्रजापतेः प्राणः परमेष्ठिनः प्राणस्तौ ते प्राणन्दत्तां ययोः प्राण-स्ताभ्यां वां स्वाहा ॥ यदऽसर्पस्तत्सर्पिरभवो यन्नवमैस्तन्नवनीत-ममवो यदऽघ्रियथास्तद्घृतमभवो ॥ घृतस्य धारामसृतस्य पन्था-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

मिन्द्रेण दत्तं प्रयतं मरुद्भिः । तत्त्वा विष्णुरन्वपश्यत्तत्त्वेडा गव्यैरयत् ॥ पावमानेन त्वा स्तोमेन गायत्र्या वर्तन्या पांशोर्वीर्येणोद्धराम्यसौ ॥ बृहता त्वा रथन्तरेण त्रिष्टुभा वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसौ ॥ अग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे जीवनस्याऽया असौ । देवा आयुष्मन्तस्तेऽमृतेनाऽयुष्मन्तस्तेपामयमायुपाऽयुष्मानऽस्त्वसौ ॥ ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तस्यायमायुपाऽयुष्मानऽस्त्वसौ ॥ अग्निरायुष्मान्स वनस्पतिभिरायुष्मांस्तस्यायमाऽयुपाऽयुष्मानऽस्त्वसौ ॥ यज्ञ आयुष्मान्स दक्षिणाभिरायुष्मांस्तस्यायमायुपाऽयुष्मानऽस्त्वसौ ॥ सोम आयुष्मान्स ओषधीभिरायुष्मांस्तस्यायमायुपाऽयुष्मानऽस्त्वसौ ॥ ओषधय आयुष्मतीस्ता अद्भिरायुष्मतीस्तासामयमाऽयुपाऽयुष्मानऽस्त्वसौ ॥ इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथाऽसत् ॥ अश्विनोः प्राणस्तौ ते प्राणन्दत्तां तेन जीव, मित्रावरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव, बृहस्पतेः प्राणः स ते प्राणन्दत्ताचेन जीव ॥ (अब पूजामण्डप के दिशाओं का अक्षतयुक्त राक्षस घातक तिल फेंकना) ॥ ("प्रथम पूर्व को") ॥ ये देवाः पुरःसदोऽग्निनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ (दक्षणको) ये देवा दक्षिणात्सदो यमनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ (पश्चिम को) ॥ ये देवाः पश्चात्सदो मरुन्नेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा॥ (उत्तर को) ॥ ये देवा उत्तरात्सदो मित्रावरुणनेत्रा रक्षो-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

हणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ (उपर आकाशको) ॥ ये देवा उपरिषदः सोमनेत्रा अवस्वदन्तो रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः स्वाहा ॥ (आग्नेय कोण को)॥ इदमहं रक्षोभिः समूहाम्यग्ने संदह रक्षः संदग्धं रक्षोग्नये पुरःसदे रक्षोघ्ने स्वाहा ॥ (नैऋत कोण को) यमाय दक्षिणासदे रक्षोघ्ने स्वाहा ॥ (वायव्यकोण को) मरुद्भ्यः पश्चात्सद्भ्यः रक्षोहभ्यः स्वाहा (ईशानकोण को) मित्रावरुणाभ्यामुत्तरात्सद्भ्यां रक्षोहभ्यां स्वाहा ॥ (नीचे धरती को) ॥ सोमायोपरिषदेऽवस्वदते रक्षोघ्ने स्वाहा ॥ (अब प्रणीतपात्र के विष्टर से उस का पानी आलोडन करना) ॥ रक्षः पञ्चवाही दक्षिणा ॥ (उस विष्टर से द्रव्यों की शुद्धि करना ॥ "पहिले जल की") ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन, महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते ह नः, उशतीरिव मातरः । तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ, आपो जनयथा च नः ॥ (अक्षतकी शुद्धि) ॥ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम्, भवावाजस्य सङ्गथे ॥ (फूलों की) पुष्पवतीः प्रसुमतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ (तिलककी) ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ (कुशाकी) ॥ कर्मणे वां वानस्पत्यमसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः प्रियमाणाद्धिषेण बर्हिरच्छ मनुना कृता सुधया वितुष्ट उर्वन्तरिक्षं वीहि ॥ (धूपकी) धूरसि धूर्व

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

धूर्वन्तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामस्तं च धूर्व । देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमं विष्णोः क्रमोऽस्याहुतमसि हविर्धानं दृंहस्व माह्वार्मित्रस्य त्वा चक्षुषा प्रेक्ष उरु त्वा वाताय वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गिरस्वत् । रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत् । आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वत् । विश्वे त्वा देवा वैश्वानरा धूपयन्तु आनुष्टुभेन छन्दसाऽङ्गिरस्वत् इन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ॥ (धूपकी) उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ (दीपकी) ॥ तेजोसि शुक्रमसि ज्योतिरसि धामासि प्रियन्देवानामनाधृष्टं देवयजनं देवताभ्यस्त्वा देवताभ्यो गृह्णामि यज्ञेभ्यस्त्वा यज्ञियेभ्यो गृह्णामि ॥ (अपने आप को तिलक लगाना) ॥ अध्वर्योऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय । विश्वस्मै भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद्देवयज्ञ । (अक्षत और फूल चढाना) ॥ इहैवैधि मा पच्योष्ठाः पर्वता इवाविचाचलत् । इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमुदारय ॥ (दो काण्ड दर्भ का अपना आसन छोडना) ॥ इममिन्द्रो अदीधरद्ध्रुवन्ध्रुवेण हविषा हविः । तस्मै सोमो अधिब्रुवत्तसा उ ब्रह्मणस्पतिः ॥ (कलश को आसन छोडना) ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि ॥ (भूमी को तिलकफूल और अक्षत लगाना) ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ (आकाश

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

श्री ... १२०

को) ॥ बडित्था पर्वतानां क्षेत्रं बिभर्षि पृथिवि प्रया भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ (अष्टदलके नीचे लिखे हुई पांच कोनों मेंसे वायुकोण पर गणेश को) ॥ निषुसीद गणपते गणेषुत्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत्क्रियते किंचनारे महामर्कं मघवंश्चित्रमर्च ॥ (नैर्ऋतकोण पर कुमार को) ॥ कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे । अनीकमस्य नमिमज्जनासः पुरा पश्यन्ति निहितमरतौ ॥ (ईशानकोण पर श्रिई को) अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ (बीच में उपर सरस्वती को) ॥ इयं शुष्मेभिर्बिसखा इवारुजत्सानुर्गिरीणान्तविषेभिरूर्मिभिः । पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः ॥ (बीच में नीचे लक्ष्मीको) कांस्यस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ (आग्नेय कोणपर विश्वकर्म को) ॥ विश्वकर्मा विश्वदेवो विश्वजिद्विश्वदर्शितः । ते त्वा घृतस्य धारया श्रेष्ठाय समसूषत ॥ (कलशपात्र में और देवों को) ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगानाम् । श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ यो रुद्रो अग्नौ योऽप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

रत्नधातमम् ॥ इषे त्वोर्जे त्वा वायवः स्थो, पायवः स्थ देवो वः सविता प्रार्पयतु, श्रेष्ठतमाय कर्मणे ॥ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि ॥ शन्नो देवीरभीष्टय आपो भवन्तु पीतये, शंय्योरभिस्रवन्तु नः ॥ आहं पितॄन्सुविदत्रां अवित्सि न पातञ्च विक्रमणं च विष्णोः । बर्हिषदो ये स्वधया सुतस्य भाजन्त पित्वस्त इहागमिष्ठाः ॥ वषट्ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदानः ॥ फाल्गुणे शक्तिसहिताय चक्रिणे नमः । क्रियासहिताय गोविन्दाय नमः ॥ दुर्गायै नमः । त्र्यम्बकाय नमः, वरुणाय नमः, यज्ञपुरुषाय नमः अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यो नमः ॥ (प्रधान हैं) ॥ रात्रीं प्रपद्ये जननीं सर्वभूतनिवेशिनीम् । भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥ संवेशिनीं संयमनीं ग्रहनक्षत्रमालिनीम् । प्रपन्नोऽहं शिवां रात्रीं भद्रे पारमशीमहिनमः । कालरात्र्यै नमः तालरात्र्यै नमः राज्ञिरात्र्यै नमः शिवरात्र्यै नमः ॥ यो रुद्रो अग्नौ य अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ क्षेत्रस्य पतिना वयं हितेनेव जयामसि गामश्वं पोषयित्वा स नो मृडातीदृशे ॥

द्वादश्यां त्रयोदश्यां	"पूर्वे"	देवीपुत्र हेरकनाथाय देवीपुत्र बटुकनाथाय	"आग्नेये"	त्रिपुरान्तकाय भूतबलेभ्यो
"दक्षिणे"	वेतालराजाय अग्निवेतालराजाय	"नैर्ऋते"	अग्निजिह्वाय बहुखातकेश्वराय	"पश्चिमे"
करालाय स्थानक्षेत्रपालाय	"वायव्ये"	कामाख्याय मङ्गलराजाय	"उत्तरे"	एकपादाय योगिनीबलेभ्यो

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

"ईशाने" भीमरूपिणे विश्वक्सेनाय "ऊर्ध्वे" तारकाख्याय जयत्सेनाय "पाताले" हाटकेश्वराय "मध्ये" राजराजेश्वराय चण्डाय नमः समस्तशिवरात्रीयागदे-तेजाय

वताभ्यो नमः तद्विष्णोः परमं० विष्णु—पञ्चायतनदेवताभ्यो नमः। अभयङ्करीदेव्यै नमः क्षेमङ्करीभगवत्यै नमः सर्वशत्रुघातिन्यै नमः इह राष्ट्राधिपतये अमुकभैरवाय नमः ॥ यौ ते श्वानौ यमरक्ष-तारौ चतुरक्षौ पथिरक्षी नृचक्षसौ । ताभ्यामेनं परिदेहिराज-न्स्वस्ति चास्मा अनमीवञ्च धेहि ॥ यत्र वेत्थ वनस्पते देवानां गुह्या नामानि तत्र हव्यानि गन्तय ॥ मुञ्चामि त्वा हविषा जीवनायकमज्ञातयक्ष्मादुत राजयक्ष्मात् । ग्राहि जग्राह यदि वैतदेनन्तस्या इन्द्राग्नी प्रमुमुक्तमेनम् ॥ अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादात्मनस्तमिदं विवृहामि ते ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते, विष्णोर्यत्परमं पदम् ॥ गायत्र्यै नमः । ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥३॥ ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नातिविध्यन्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥ (कलश को नैवेद्य रखना) सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यामादधे । महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय फाल्गुणे शक्तिसहिताय चक्रिणे, कि-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

यासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः कालरात्र्यै तालरात्र्यै रात्रिरात्र्यै शिवरात्र्यै द्वादश्यां त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय देवीपुत्रबटुकनाथाय "आग्नेये" त्रिपुरान्तकाय भूतबलेभ्यः "दक्षिणे" वेतालराजाय अग्निवेतालराजाय "नैर्ऋतये" अग्निजिह्वाय बहुसातकेश्वराय "पश्चिमे" करालाय स्मानक्षेत्रपालाय "वायवे" कामाख्याय गङ्गलराजाय "उत्तरे" एकपादाय योगिनीबलेभ्यः "ईशाने" भीमरूपिणे विश्वक्सेनाय "ऊर्ध्वे" तारकाख्याय जयंदसेनाय "पाताले" हाटकेश्वराय तेजाय "मध्ये" राजराजेश्वराय चण्डाय समस्तशिवरात्रीयागदेवताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इह राष्ट्राधिपतये अमुकभैरवाय तिलतण्डुलमात्रं दधिमधुमिश्रं ॐ नमो नैवेद्यं निवेदयामि नमः ॥ (कलश को फूल अर्घ छोडना) ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥ यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव । ईशेयो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ २ ॥ य ओजदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ ३ ॥ येन द्यौरुग्रा पृथिवी दृढा येन सुस्तम्भितं येन नाकम् । यो अन्तरिक्षं विममे वरीयः कस्मै देवाय हविषा

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Kalash Pooja

विधेम ॥ ४ ॥ य इमे द्यावा पृथिवी तस्तभाने आधारयद्रोधसी रेजमाने । यस्मिन्नधि विततः सूर एति कस्मै देवाय हविषा विधेम ॥ ५ ॥ यस्येमे विश्वे गिरयो महित्वा समुद्रं यस्य रसया सहाहुः । दिशो यस्य प्रदिशः पञ्चदेवी कस्मै देवाय हविषा विधेम ॥ ६ ॥ आपो ह यन्महती विश्वमायुर्गर्भं दधाना जनयन्तीरग्निम् । ततो देवानां निरवर्तताऽसुरेकः कस्मै देवाय हविषा विधेम ॥ ७ ॥ आ नः प्रजाञ्जनयतु प्रजापति-र्धाता दधातु सुमनस्समानः । संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ ८ ॥ अर्चन्तस्त्वा हवामहे अर्चन्तः समिधीमहि । अग्नेरर्चत ऊतये अर्चत प्रार्चत प्रियमेधसो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्णमर्चत अर्चत अर्चत ॥ इति कलशस्थापनम् ॥

Kalash Pooja finish (ends here)

SANIPATLOO Pooja

अथ पूजाविधिः । (पीठ परे सन्यपुतुल रखके, पानी छोडना) । अस्य श्री आसनशोधनमन्त्रस्य, मेरुपृष्ठ ऋषिः, सुतलं च्छन्दः, कूर्मो देवता, आसनशोधने विनियोगः । मेरुपृष्ठ ऋषये नमः शिरसि (सिरको हाथों से छोना) सुतलं च्छन्दसे नमः, मुखे (मुंहको) कूर्मो देवतायै नमः हृदि (हृदय को) आसनशोधने विनियोगाय नमः सर्वाङ्गेषु । (सब अङ्गों को) ॥ (दो दर्भकाण्डे भूमी को आसन छोडना) ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि । (गन्ध अर्घ फूल देना) श्रीं पृथिव्यै आधारशक्त्यै समालभनं गन्धो नमः अर्घो नमः पुष्पं नमः । (हाथ जोड के मांगना) पृथ्वि त्वया

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ (अथ इष्टदेवके स्मरणपूर्वक नमस्कार करना) शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि । सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् । सदा रमन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः । गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ गुरवे नमः, परमगुरवे नमः, परमेष्ठिने गुरवे नमः, परमाचार्याय नमः, आद्यसिद्धेभ्यो नमः॥ (अब न्यास करना) अ नाभौ (नाभिस्थान को हाथोंसे छोना) उ हृदि (हृदयको) म शिरसि (सेरको) । भूः पादयोः (पैरोंको)। भुवः हृदि (हृदयको) स्वः शिरसि (सेरको) भूरङ्गुष्ठाभ्यां नमः (अङ्गुठोंको) भुवस्तर्जनीभ्यां नमः (दूसरी अंगुली को) स्वर्मध्यमाभ्यां नमः (तीसरी अङ्गुली को) महः अनामिकाभ्यां नमः (चौथमी अङ्गुली को) जनः कनिष्ठिकाभ्यां नमः (पिच्छली अङ्गुली को) तपःसत्यं करतलकरपृष्ठाभ्यां नमः (हाथों के दोतले और दो पीठभी मेलाना) भूः पादयोः (पैरोंको) भुवः जान्वोः (घुट्टनोंको) स्वः गुह्ये (गुदाको) महः नाभौ (नाभी को) जनः हृदि (हृदयको) तपः कण्ठे (गले को) सत्यं शिरसि (सेरको) ॥ भूः हृदयाय नमः (हृदयको) भुवः शिरसे स्वाहा (सिरको) स्वः शिखायै वषट् (शिखाको) महः कवाचाय हुं (बाही हाथ दाही कान के दाही हाथ बाही कान के आगे रखना)

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

जनः नेत्राभ्यां वौषट् (आखोंको) तपः सत्यमस्त्राय फट् (तीन छोटिका सिरको ईर्द गीर्द मारना) ॥ (इस्मीतराह औरोंभी) तत्सवितुरङ्गुष्ठाभ्यां नमः । वरेण्यं तर्जनीभ्यां नमः । भर्गो देवस्य मध्यमाभ्यां नमः । धीमहि अनामिकाभ्यां नमः । धियो योनः कनिष्ठिकाभ्यां नमः । प्रचोदयात्करतलकरपृष्ठाभ्यां नमः । तत्पादयोः सवितुर्जान्वोः ॥ वरेण्यं कट्यां । भर्गो नाभौ ॥ देवस्य हृदये । धीमहि कण्ठे ॥ धियो नासिकायां । यश्चक्षुषे ॥ नः ललाटे । प्रचोदयाच्छिरसि ॥ तत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा ॥ भर्गो देवस्य शिखायै वषट् । धीमहि कवचाय हुं ॥ धियो योनः नेत्राभ्यां वौषट् । प्रचोदयादऽस्त्राय फट् ॥ आपः स्तनयोः । ज्योतिर्नेत्रयोः ॥ रसो मुखे । अमृतं ललाटे ॥ ब्रह्मभूर्भुवः स्वरों शिरसि । यो रुद्रो अग्नौ, हृदयाय नमः ॥ यो अप्सु य ओषधीषु, शिरसे स्वाहा । यो वनस्पतिषु, शिखायै वषट् ॥ यो रुद्रो विश्वा भुवना विवेश, कवचाय हुँ । तस्मै रुद्राय, नेत्राभ्यां वौषट् ॥ नमो अस्तु देवा अस्त्राय फट् । (चारों तरफ तेल फेंकते हुई पडना) अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ (प्राणायाम करना) । ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयादोमापो ज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ॥ (पैरो और मुंह को छेडकना) तीर्थे स्वयं तीर्थमेव समानानां भवति, मानः शंसो अररुषो धूर्तिः प्राणङ् मर्त्यस्य रक्षाणो ब्रह्मणस्पते ॥ (पवित्र अनामिका में धारना) वसोः

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्ति ॥ (शकुनसहित आशीर्वाद देना) ॥ यावदिन्द्रादयो देवा यावच्चन्द्रदिवाकरौ । यावद्रामकथा लोके भूयात्तावत्स्थितिस्तव ॥ (रक्षासूत्र बान्धना) ॥ यदाबन्धन्दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानः । तन्म आबध्नामि शतशारदायाऽयुष्माञ्जरदष्टिर्यथासत् ॥ रक्षस्व मे केशवः सविता सत्यधर्मा रक्षस्व मे केशवः प्राणधनानि यानि । रक्षस्व मे केशवश्चोभयलोकवीरं शंनो भवतु मे द्विपदे शं चतुष्पदे ॥ रक्षाणो ब्रह्मणस्पते ॥ (अपने आप को गन्ध व पुष्प और अर्घ लगाना) परमात्मने पुरुषोत्तमाय पञ्चभूतात्मकाय विश्वात्मने मन्त्रनाथाय आत्मने नारायणाय आधारशक्त्यै समालभनं गन्धो नमः । अर्घोनमः । पुष्पं नमः ॥ (दीवा को गन्ध अर्घ और फूल चडाना) । स्वप्रकाशो महादीपः सर्वतस्तिमिरापहः । प्रसीद मम गोविन्द दीपोयं परिकल्पितः ।(धूप को)। वनस्पतिरसो दिव्यो गन्धाढ्यो गन्धवत्तमः । आधारः सर्वदेवानां धूपोयं परिकल्पितः ॥ (सूरज को) नमो धर्मनिधानाय नमः स्वकृतसाक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमो नमः ॥ (अर्घ व विष्टर समेत पानीसे संकल्पछोडना) यत्रास्ति माता न पिता न बन्धुर्भ्रातापि नो यत्र सुहृज्जनश्च । न ज्ञायते यत्र दिनं न रात्रिस्तत्रात्मदीपं शरणं प्रपद्ये । आत्मने नारायणाय आधारशक्त्यै दीपधूपसङ्कल्पात्सिद्धिरस्तु दीपोनमः धूपोनमः । तत्सद्ब्रह्म अद्यतावत्तिथावद्य फाल्गुनमासस्य कृष्णपक्षस्य तिथौ त्रयोदश्यां शनिवारान्वितायां

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

Vatak Pooja

महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्दे-
वताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदे-
वताभ्यः चातुर्वेदेश्वराय सानुचराय क्रतुपतये नारायणाय
फाल्गुने शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय
दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृ-
गणयागदेवताभ्यः ॥ कालरात्र्यै तालरात्र्यै राज्ञिरात्र्यै शिवरात्र्यै

द्वादश्यां / त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय / देवीपुत्रवटुकनाथाय "आग्नेये" त्रिपुरान्तकाय / भूतवलेभ्यः

"दक्षिणे" वेतालराजाय / अग्निवेतालराजाय "नैर्ऋतये" अग्निजिह्वाय / वहुखातकेश्वराय

"पश्चिमे" करालाय / स्थानक्षेत्रपालाय "वायवे" कामाख्याय / मङ्गलराजाय "उत्तरे" एकपादाय / योगिनीवलेभ्यः

"ईशाने" भीमरूपिणे / विश्वक्सेनाय "ऊर्ध्वे" तारकाख्याय / जयत्सेनाय

"पाताले" हाटकेश्वराय / तेजाय "मध्ये" राजराजेश्वराय / चण्डाय समस्तशिवरात्रीदे-
वताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभ-
वान्यै सर्वशत्रुघातिन्यै इह राष्ट्राधिपतये अमुकभैरवाय आत्मनो
वाङ्मनःकायोपार्जितपापनिवारणार्थं शिवरात्रीव्रतनिमित्तं दीप-
धूपात्संकल्पसिद्धिरस्तु दीपोनमः धूपोनमः ॥ अपसव्येन (बाहे
तर्फ जञ्जू रख के तिल समेत) नमः पितृभ्यः प्रेतेभ्यो नमो
धर्माय विष्णवे । नमो यमाय रुद्राय कान्तारपतये नमः ॥ ३ ॥
तत्सद्ब्रह्माऽद्यतावत्तिथौ० ॥ पित्रे पितामहाय प्रपितामहाय ।
मात्रे पितामह्यै प्रपितामह्यै । मातामहाय प्रमातामहाय वृद्धप्रमा-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

तामहाय । मातामह्यै प्रमातामह्यै वृद्धप्रमातामह्यै समस्तमाता-
पितृभ्यो द्वादशदैवतेभ्यः पितृभ्यः शिवरात्रीव्रतनिमित्तं दीपः
स्वधा धूपःस्वधा ॥ "सव्येन ॥" (दाहीं तर्फ जन्नू रख के
तीन दफा फूल और गन्ध विष्टरसहित पानीकी पात्र
में छोडना) संवः सृजामि हृदयं संसृष्टं मनो अस्तु वः ॥१॥
संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ॥ २ ॥ संप्र्या
वः प्रियास्तन्वः संप्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः
संप्रियास्तन्वो मम ॥ ३ ॥ (सब देवों को जीवाधान देना,
उस पानी से) । अश्विनोः प्राणस्तौ ते प्राणन्दत्तान्तेन जीव
मित्रावरुणयोः प्राणस्तौ ते प्राणंदत्तान्तेन जीव, बृहस्पतेः प्राणः
स ते प्राणन्दत्तात्तेन जीव । (देव को दो दर्भकाण्डों से चा
मर सा न्यास करना) अ नाभौ, उ हृदि, म शिरसि, भूः
पादयोः भुवः हृदि, स्वः शिरसि । भूरङ्गुष्ठाभ्यां नमः भुवस्तर्ज-
नीभ्यां नमः स्वर्मध्यमाभ्यां नमः महः अनामिकाभ्यां नमः जनः
कनिष्ठिकाभ्यां नमः तपःसत्यं करतलकरपृष्ठाभ्यां नमः । भूः
पादयोः भुवःजान्वोः स्वःगुह्ये महः नाभौ जनःहृदि तपःकण्ठे
सत्यं शिरसि । भूः हृदयाय नमः भुवःशिरसे स्वाहा स्वः शिखायै
वषट् महःकवचाय हुं जनः नेत्राभ्यां वौषट् तपःसत्यमस्त्राय-
फट् ॥ तत्सवितुरङ्गुष्ठाभ्यां नमः। वरेण्यंतर्जनीभ्यां नमः
भर्गोदेवस्य मध्यमाभ्यां नमः धीमहिअनामिकाभ्यांनमः धियो-
योनः कनिष्ठिकाभ्यांनमः प्रचोदयात्करतलकरपृष्ठाभ्यां नमः ।
तत्पादयोः सवितुर्जान्वोः वरेण्यं कट्यां भर्गो नाभौ, देवस्य
हृदये, धीमहि कण्ठे, धियोनासिकायां, यश्चक्षुषे, नः

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

ललाटे, प्रचोदयाच्छिरसि । तत्सवितुर्हृदयाय नमः वरेण्यं शिरसेस्वाहा भर्गोदेवस्यशिखायैवषट् धीमहिकवचायहुं धियोयोनः नेत्राभ्यां वौषट् प्रचोदयादस्त्राय फट् । आपः स्तनयोः ज्योतिर्नेत्रयोः रसो मुखे अमृतं ललाटे ब्रह्मभूर्भुवःस्वरों शिरसि ॥ यो रुद्रो अग्नौ हृदयाय नमः, यो अप्सु य ओषधीषु शिरसे स्वाहा, यो वनस्पतिषु शिखायै वषट्, यो रुद्रो विश्वा भुवना विवेश कवचाय हुँ तस्मै रुद्राय नेत्राभ्यां वौषट्, नमो अस्तु देवाः अस्त्राय फट् ॥ (दो दर्भकाण्ड अक्षतयुक्त हाथ में रख के देवों से पूजा की आज्ञा लेना)। ॐभूः पुरुषमाऽवाहयामि नमः ॐभुवःपुरुषमावाहयामि नमः ॐस्वः पुरुषमावाहयामि नमः ॐभूर्भुवःस्वःपुरुषमावाहयामि नमः ॥२॥ ॐभूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ३ ॥ ॐह्रींश्रींदेवीपुत्राय विद्महे क्षेत्रेशमुख्याय धीमहि द्वादश्यां / त्रयोदश्यां तन्नः हेरकभैरवः / वटुकभैरवः प्रचोदयात् ॥३॥ ॐतत्सद्ब्रह्माद्यतावत्तिथावद्य फाल्गुनमासस्य कृष्णपक्षस्य तिथावमुकायां अमुकवारान्वितायां महागणपतेः कुमारस्य श्रियः सरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वार्देवतानां प्रजापतेः ब्रह्मणः कलशदेवतानां ब्रह्मविष्णुमहेश्वरदेवतानां चातुर्वेदेश्वरस्य सानुचरस्य ऋतुपतेर्नारायणस्य "फाल्गुने" शक्तिसहितस्य चक्रिणः क्रियासहितस्य गोविन्दस्य दुर्गायाः त्र्यम्बकस्य वरुणस्य यज्ञपुरुषस्य अग्निष्वात्तादीनां पितृगणयागदेवतानां कालरात्र्याः तालरात्र्याः राज्ञिरात्र्या शिवरात्र्या द्वादश्यां / त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथस्य / देवीपुत्रवटुकनाथस्य

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

"आग्नेये" त्रिपुरान्तकस्य भूतवलानां "दक्षिणे" वेतालराजस्य अग्निवेतालराजस्य "नैर्ऋते"
अग्निजिह्वस्य वहुखातकेश्वरस्य "पश्चिमे" करालस्य स्थानक्षेत्रपालस्य "वायवे" कामाख्यस्य मङ्गलराजस्य
"उत्तरे" एकपादस्य योगिनीवलानां "ईशाने" भीमरूपिणः विश्वक्सेनस्य "ऊर्ध्वे"
तारकाख्याय जयक्सेनस्य "पाताले" हाटकेश्वरस्य तेजस्य "मध्ये" राजराजेश्वरस्य चण्डस्य

विष्णुपञ्चायतनदेवतानां अभयङ्करीदेव्याः क्षेमङ्करीभवान्याः सर्वशत्रुघातिन्याः इहराष्ट्राधिपतेः अमुकभैरवस्य आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं शिवरात्रीव्रतनिमित्तं कलशपूजनं शिवरात्रीयागपूजनमर्चामहं करिष्ये ॐ कुरुष्व ॥ (तिल सर्षप और जवें चारोंतर्फ फैंकके, आसन देना ॥) मृडा नो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छञ्च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामसि ॥ महागणपतेः कुमारस्य श्रियः सरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वार्देवतानां प्रजापतेः ब्रह्मणः कलशदेवतानां ब्रह्मविष्णुमहेश्वरदेवतानां चातुर्वेदेश्वरस्य सानुचरस्य ऋतुपतेः नारायणस्य "फाल्गुने" शक्तिसहितस्य चक्रिणः, क्रियासहितस्य गोविन्दस्य दुर्गायाः त्र्यम्बकस्य वरुणस्य यज्ञपुरुषस्य अग्निष्वात्तादीनां पितृगणयागदेवतानां कालरात्र्याः तालरात्र्याः राज्ञिरात्र्याः शिवरात्र्याः

द्वादश्यां त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथस्य देवीपुत्रवटुकनाथस्य "आग्नेये" त्रिपुरान्तकस्य भूतवलानां

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

"दक्षिणे" वेतालराजस्य / अग्निवेतालराजस्य "नैर्ऋते" अग्निजिह्वस्य / बहुखातकेश्वरस्य "पश्चिमे"

करालस्य / स्थानक्षेत्रपालस्य "वायवे" कामाख्यस्य / मङ्गलराजस्य "उत्तरे" एकपादस्य / योगिनीबलानां

"ईशाने" भीमरूपिणः / विश्वक्सेनस्य "ऊर्ध्वे" तारकाख्यस्य / जयक्सेनस्य "पाताले"

हाटकेश्वरस्य / तेजस्य "मध्ये" राजराजेश्वरस्य / चण्डस्य समस्तशिवरात्रीदेवतानां

विष्णुपञ्चायतनदेवतानां अभयङ्करीदेव्याः क्षेमङ्करीभवान्याः सर्वशत्रुघातिन्याः इह राष्ट्राधिपतेः अमुकभैरवस्य इदमासनं नमः ॥ (अर्घसमेत दो दर्भों हाथ में रख कर आवाहन करना) ॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायैत्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः कालरात्र्यै तालरात्र्यै रात्रिरात्र्यै शिवरात्र्यै द्वादश्यां / त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय / देवीपुत्रवटुकनाथाय

"आग्नेये" त्रिपुरान्तकाय / भूतबलेभ्यः "दक्षिणे" वेतालराजाय / अग्निवेतालराजाय "नैर्ऋते"

अग्निजिह्वाय / बहुखातकेश्वराय "पश्चिमे" करालाय / स्थानक्षेत्रपालाय "वायवे" कामाख्याय / मङ्गलराजाय

"उत्तरे" एकपादाय / योगिनीबलेभ्यः "ईशाने" भीमरूपिणे / विश्वक्सेनाय "ऊर्ध्वे"

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

तारकाख्याय जयक्सेनाय "पाताले" हाटकेश्वराय तेजाय "मध्ये" राजराजेश्वराय चण्डाय

समस्तशिवरात्रीयागदेवताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय युष्मान् वः पूजयामि ॐ पूजय । इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा नः शमस द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । महागणपतिं कुमारं श्रियं सरस्वतीं लक्ष्मीं विश्वकर्माणं द्वार्देवताः प्रजापतिं ब्रह्माणं कलशदेवताः ब्रह्मविष्णुमहेश्वरदेवताः चातुर्वेदेश्वरं सानुचरं ऋतुपतिं नारायणं "फाल्गुने" शक्तिसहितं चक्रिणं क्रियासहितं गोविन्दं दुर्गां त्र्यम्बकं वरुणं यज्ञपुरुषं अग्निष्वात्तादीः पितृगणयागदेवताः

कालरात्रीं तालरात्रीं रात्रिरात्रीं शिवरात्रीं द्वादश्यां त्रयोदश्यां "पूर्वे"

देवीपुत्रहेरकनाथं देवीपुत्रबटुकनाथं "आग्नेये" त्रिपुरान्तकं भूतबलान् "दक्षिणे" वेतालराजं अग्निवेतालराजं

"नैरृते" अग्निजिह्वं बहुखातकेश्वरं "पश्चिमे" करालं स्थानक्षेत्रपालं "वायवे"

कामाख्यं मङ्गलराजं "उत्तरे" एकपादं योगिनीबलान् "ईशाने" भीमरूपिणं विश्वक्सेनं "ऊर्ध्वे"

तारकाख्यं जयक्सेनं "पाताले" हाटकेश्वरं तेजं "मध्ये" राजराजेश्वरं चण्डं समस्तशिवरात्रीदेवताः विष्णुपञ्चायतनदेवताः अभयङ्करीदेवीं क्षेमङ्करीभ-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

वानीं सर्वशत्रुघातिनीं इहराष्ट्राधिपतिं अमुकभैरवं आवाहयिष्यामि ॐ आवाहय ॥ (काश्मीरी भाषा में । बबरकाठ फुलों से आवाहन करना) । (द्वादशी दिनके आवाहन) आवाहयामि देवेशं हेरकं भैरवेश्वरम् । उग्रदंष्ट्रं भीमरूपं पूर्वस्यां विघ्नहारकम् ॥ "पूर्वे" हेरकाय नमः ॥ आवाहयामि भूतेशं त्रिपुरान्तकभैरवम् । त्रिनेत्रं भीमकर्माणमाग्नेये विघ्ननाशकम् ॥ "आग्नेये" त्रिपुरान्तकाय नमः ॥ आवाहयामि विश्वेशं वेतालमतिभैरवम् । हयारूढं वृतं वीरैर्दक्षिणे दुःखहारकम् ॥ "दक्षिणे" वेतालराजाय नमः । आवाहयामि वीरेशमऽग्निजिह्वं शवासनम् । भूतसङ्घानुगं भीमं नैर्ऋते विघ्नभक्ष्यकम् ॥ "नैर्ऋते" अग्निजिह्वाय नमः । आवाहयामि श्रीकण्ठं करालं भैरवाकृतिम् । करालवदनं घोरं पश्चिमे कृतमङ्गलम् ॥ "पश्चिमे" करालाय नमः । आवाहयामि कामाख्यं भैरवेशं शवासनम् भक्ताभीष्टकरं क्रूरं वायवेऽतिसुखप्रदम् ॥ "वायवे" कामाख्याय नमः । आवाहयाम्येकपादभैरवं सिंहवाहनम् । त्र्यक्षं पिङ्गलकेशाढ्यमुत्तरे भयनाशनम् ॥ "उत्तरे" एकपादाय नमः । आवाहयामि प्रेताढ्यं भीमरूपिणमीश्वरम् । खड्गकपालमालाढ्यमीशाने सौख्यदं नृणाम् ॥ ईशाने" भीमरूपिणे नमः । आवाहयामि भूताढ्यं तारकाख्यं हि भैरवम् । उग्ररूपधरं भीममाकाशे भयनाशकम् ॥ "ऊर्ध्वे" तारकाख्याय नमः । आवाहयामि देवेन्द्रं हाटकेश्वरभैरवम् । भक्ताभीष्टकरं त्र्यक्षं पाताले भयकृन्तनम् ॥ "पाताले" हाटकेश्वराय नमः । आवाहयामि वीरास्यं राजराजेश्वरं प्रभुम् ॥ यक्षरक्षोगणैः सेव्यं मध्ये भीतिहरं नृणाम् ॥ "मध्ये" राजराजेश्वराय नमः ॥

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

(त्रयोदशी दिनके आवाहन) कुलाकुलपदे योसौ पालको भूतविग्रहः । चिदानन्दरसपूर्णं वन्दे बटुकभैरवम् ॥ नृत्यन्तं भुजयुगलेन दत्ततालं पञ्चास्यं दहनपतङ्गकोटिभासम् । सत्पात्रद्विजक खड्गचर्महस्तं वीरेशं बटुकमभीष्टदं प्रपद्ये ॥ "पूर्वे" बटुकाय नमः ॥१॥ आवाहयामि चाग्नेये भूतबलगणं विभुम् । शवासनं रसभुजं भक्ताभयवरप्रदम् । "आग्नेये" भूतबलेभ्यो नमः ॥ २ ॥ आवाहयामि वक्रैकमग्निवेतालभैरवम् । खरकर्णं विशालाक्षं दक्षिणे विघ्नहारिणम् ॥ "दक्षिणे" अग्निवेतालराजाय नमः ॥ ३ ॥ आवाहयामि नैर्ऋत्यां त्वां बहुखातकेश्वरम् । उग्रदंष्ट्रं महौजस्कमष्टबाहुं शवासनम् । "नैर्ऋते" बहुखातकेश्वराय नमः ॥४॥ आवाहयामि वारुण्यां त्वां स्थानक्षेत्रपालकम् । त्रिलोचनं पञ्चवक्रं मुण्डखड्गाद्युदायुधम् । "पश्चिमे" स्थानक्षेत्रपालाय नमः ॥५॥ आह्वये मङ्गलेशानं पञ्चवक्रं कपालिनम् । पङ्कज रक्तवर्णं त्वां वायवे सिद्धिदं विभुम् । वायवे मङ्गलराजाय नमः ॥ ६ ॥ योगिनीबलवृन्दं तं प्रपद्येऽहं चतुर्भुजम् । उत्तरे योगिनीयुक्तं नृत्यगीतप्रियं प्रभुम् । उत्तरे योगिनीबलेभ्यो नमः ॥ ७ ॥ विष्वक्सेनं प्रपद्येहं पञ्चवक्रं भयानकम् । अष्टबाहुं दीर्घनासमैशान्यां सिद्धिदायकम् । "ईशाने" विष्वक्सेनाय नमः ॥ ८ ॥ जयक्सेनं प्रपन्नोहं त्रिनेत्रं सूकराननम् । आकाशे विघ्नभीतिघ्नं प्रेतासनकृतस्थितिम् । "ऊर्ध्वे" जयक्सेनाय नमः ॥ ९ ॥ आवाहयामि पाताले स्वामिनं तेजभैरवम् । त्रिनेत्रं प्रेतमध्यस्थं नानायुधविराजितम् । "पाताले" तेजाय नमः ॥ १० ॥ आवायाम्यहं मध्ये चण्डं चण्डेश्वरं विभुम् । सप्तवक्रं

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

विंशभुजं भक्ताभीष्टाभयप्रदम् । "मध्ये" चण्डाय नमः ॥११॥ भगवन्पुण्डरीकाक्ष भक्तानुग्रहकारक । अस्मद्दयानुरोधेन सन्निधानं कुरु प्रभो ॥ ३ ॥ इत्याहूय तु गायत्रीं त्रिः समुच्चार्य तत्ववित् । मनसा चिन्तितैर्द्रव्यैर्देवमात्मनि पूजयेत् । तेजोरूपं ततः क्षिप्त्वा प्रतिमायां पुनर्यजेत् ॥ (चारों तर्फ जऊं फैंकके प्राणायाम करना) पाद्यार्थमुदकं नमः ॥ (पात्रका पानी हाथसे उसी में और छोडना) शन्नो देवीरभीष्टय आपो भवन्तु पीतये, शंय्योरभिस्रवन्तु नः ॥ (उस पात्र में लाजा गन्ध सर्वौषधी विष्टर और पानी रखना) लाजाश्च कुङ्कुमं चैव सर्वौषधिसमन्वितम् । दर्भाङ्कुरं जलं चैव पञ्चाङ्गं पाद्यलक्षणम् (देवों को हाथ जोडना) भगवन्तः पाद्यंपाद्यं (पाद्य देना) हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योनाः भवन्तु ॥ १ ॥ यासां देवा दिवि कृण्वन्ति भक्ष्यं या अन्तरिक्षे बहुधा भवन्ति । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥ २ ॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं गर्भं दधिरे विरूपास्ता न आपः शंस्योना भवन्तु ॥ ३ ॥ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे । मधुश्च्युतः शुचयो या पावकास्ता न आपः शंस्योना भवन्तु ॥ ४ ॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः कालरात्र्यै तालरात्र्यै रात्रिरात्र्यै शिवरात्र्यै द्वादश्यां त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय देवीपुत्रवटुकनाथाय "आग्नेये" त्रिपुरान्तकाय भूतबलेभ्यः "दक्षिणे" वेतालराजाय अग्निवेतालराजाय "नैर्ऋते" अग्निजिह्वाय बहुखातकेश्वराय "पश्चिमे" करालाय स्थानक्षेत्रपालाय "वायवे" कामाख्याय मङ्गलराजाय "उत्तरे" एकपादाय योगिनीबलेभ्यः "ईशाने" भीमरूपिणे विश्वक्सेनाय "ऊर्ध्वे" तारकाख्याय जयक्सेनाय "पाताले" हाटकेश्वराय तेजाय "मध्ये" राजराजेश्वराय चण्डाय समस्तशिवरात्रीदेवताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय पाद्यंनमः ॥ (पाद्यकाशेष छोडना) पाद्यशेषं निवारयेत् ॥ (औंर हाथसे वापस पात्रमें पानी छोडना) शन्नो देवीरभिष्टय आपो भवन्तु पीतये, शंय्योरभि स्रवन्तु नः ॥ (उस पात्रमें पानी दूध विष्टर घृत दही चावल यवा सर्षप यह आठ द्रव्य पाके नमस्कार करना) आपः क्षीरं कुशाग्राणि घृतं च दधि तण्डुलाः । यवाः सिद्धार्थकाश्चेति ह्यर्घ्यमष्टाङ्गमुच्यते ॥ भगवन्तः अर्घ्यमऽर्घ्यम् । (अर्घ्य देना)। त्वेषं वयं रुद्रं यज्ञसाधनमऽङ्कुङ्कविमवसे निह्वयामहे । आरे असद्दैव्यं हेडो

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

अस्त्वतु सुमतिमिद्व्यमऽस्या वृणीमहे ॥ आपो हिष्ठा मयोभुवस्तान ऊर्जे दधातन, महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते हनः, उशतीरिव मातरः ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ, आपो जनयथा च नः । महागणपते कुमार श्रीः सरस्वति लक्ष्मीः विश्वकर्मन् द्वार्देवताः प्रजापते ब्रह्मन् कलशदेवताः ब्रह्मविष्णुमहेश्वरदेवताः चातुर्वेदेश्वर सानुचर ऋतुपते नारायण "फाल्गुने" शक्तिसहित चक्रिन् क्रियासहित गोविन्द दुर्गे त्र्यम्बक वरुण यज्ञपुरुष अग्निष्वात्तादयः पितृगणयागदेवताः कालरात्रि तालरात्रि राज्ञिरात्रि शिवरात्रि

द्वादश्यां / त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथ / देवीपुत्रबटुकनाथ "आग्नेये" त्रिपुरान्तक / भूतबलाः

"दक्षिणे" वेतालराज / अग्निवेतालराज "नैर्ऋते" अग्निजिह्व / बहुखातकेश्वर "पश्चिमे"

कराल / स्थानक्षेत्रपाल "वायवे" कामाख्य / मङ्गलराज "उत्तरे" एकपाद / योगिनीबलाः

"ईशाने" भीमरूपिन् / विश्वक्सेन "ऊर्ध्वे" तारकाख्य / जयक्सेन "पाताले" हाटकेश्वर / तेज

"मध्ये" राजराजेश्वर / चण्ड समस्तशिवरात्रीदेवताः विष्णुपश्चायतनदेवताः अभयङ्करीदेवि क्षेमङ्करीभवानि सर्वशत्रुघातिनि इह राष्ट्राधिपते अमुकभैरव इदं वः अर्घ्यं नमः ॥ (**साफा पानीसे आचमन देना**)। दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा निह्वयामहे । हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं वयं सत् ॥ शन्न आपो धन्वन्याः

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

शन्नः सन्त्वनूप्याः । शन्नः समुद्रिया आपः शमु नः सन्तु कूप्याः ॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः कालरात्र्यै तालरात्र्यै रात्रिरात्र्यै शिवरात्र्यै द्वादश्यां / त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय / देवीपुत्रवटुकनाथाय

"आग्नेये" त्रिपुरान्तकाय / भूतबलेभ्यः "दक्षिणे" वेतालराजाय / अग्निवेतालराजाय "नैर्ऋते"

अग्निजिह्वाय / बहुखातकेश्वराय "पश्चिमे" करालाय / स्थानक्षेत्रपालाय "वायवे" कामाख्याय / मङ्गलराजाय

"उत्तरे" एकपादाय / योगिनीबलेभ्यः "ईशाने" भीमरूपिणे / विश्वक्सेनाय "ऊर्ध्वे"

तारकाख्याय / जयक्सेनाय "पाताले" हाटकेश्वराय / तेजाय "मध्ये" राजराजेश्वराय / चण्डाय

समस्तशिवरात्रीदेवताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय आचमनीयं जलं नमः॥ (सफा पानीसे और भी मैली उठानी) ॥ इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् । रास्वाचनो अमृत मर्त्यभोजनं त्मने तोकाय तनयाय मृड ॥ इदमापः प्रवहत यत्किञ्चिद्दुरितं मयि । यद्वाहमभिदुद्रोह यद्वाशेप उतानृतम् ॥ महागणपतये० चातुर्वेदेश्व-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

राय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः कालरात्र्यै तालरात्र्यै राज्ञिरात्र्यै शिवरात्र्यै द्वादश्यां त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय देवीपुत्रबटुकनाथाय

"आग्नेये" त्रिपुरान्तकाय भूतबलेभ्यः "दक्षिणे" वेतालराजाय अग्निवेतालराजाय "नैर्ऋते"

अग्निजिह्वाय बहुखातकेश्वराय "पश्चिमे" करालाय स्थानक्षेत्रपालाय "वायवे" कामाख्याय मङ्गलराजाय

"उत्तरे" एकपादाय योगिनीबलेभ्यः "ईशाने" भीमरूपिणे विश्वक्सेनाय "ऊर्ध्वे"

तारकाख्याय जयक्सेनाथ "पाताले" हाटकेश्वराय तेजाय "मध्ये" राजराजेश्वराय चण्डाय

समस्तशिवरात्रीदेवताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय मन्त्रस्नानीयं नमः ॥ (पानी दूध दही घी शहद लाजा सर्षप तिल जव शाली विष्टर दूर्वा मिट्टी भस्म मेवा मिठास पञ्चामृत पञ्चगव्य कर्पूर सर्वौषधी गन्ध और फूल, २१ यह एकीस द्रव्य पात्र में जमा करना) पयोदधिघृतक्षौद्रलाजासिद्धार्थकास्तिलाः । यवव्रीहिकुशादूर्वामृद्भस्मफलशर्कराः । पञ्चामृतं पञ्चगव्यं कर्पूरौषधयस्तथा । एकविंशतिस्नानानि गन्धाद्भिःकुसुमैरपि ॥ (इन से स्नान देना) (पानी) । उदुत्तमं वरुण पाशमस्मदऽवाधमं विमध्यमं श्रथाय । अथावयं अदित्यव्रते तवानागसो अदितये स्याम ॥१॥

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

(क्षीर) पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ २ ॥ (दही) । दधि क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रण आयूंषि तारिषत् ॥ ३ ॥ (घी) घृतवती भुवनानामभिश्रियोर्वी पृथिवी मधुदुघे सुपेशसा । द्यावापृथिवी वरुणस्य धर्मणा विष्कम्भिते अजरे भूरिरेतसा ॥ ४ ॥ (शहद) । मधुवाता ऋतायते मधुक्षिरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः, मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमानऽस्तु सूर्यः, माध्वीर्गावो भवन्तु नः ॥ ५ ॥ (लाजा) । तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः । लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगऽस्य मांसमऽभवन्न लाजाः ॥ ६ ॥ (सर्षप) । रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म । शिशानो अग्निः क्रतुभिः समृद्धः स नोदिवः सरिषः पातु नक्तम् ॥ ७ ॥ (तिल) । तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रयत्नवद्भिः पितृंल्लोकान्प्राण आयाहि नः स्वधा ॥ ८ ॥ (यवा) । यवोसि यवयास्मद्द्विषं यावया रातिम् । पितृषदनं त्वा लोकमास्तृणामि ॥ ९ ॥ (शाली) । धान्यमसि धिनोहि देवान्धिनोहि यज्ञं धिनोहि यज्ञपतिं धिनोहि मां यज्ञम् ॥ १० ॥ (दर्भांकुर) । देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादधे ॥ ११ ॥ (दूर्वा) । काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥१२॥ (मिट्टी) । आक्रम्य वाजिन्पृथिवीमग्निमिच्छा रुचात्वम् ।

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

भूम्यायत्वायनो ब्रूहि यतः खनेम ते वयम् ॥१३॥ (भस्म)।
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने: । संसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः ॥ १४ ॥ (मेवा) । याः फलिनीर्या अफला अकोशाः कोशिनीश्च याः । बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वंहसः ॥ १५ ॥ (मिठास)। शर्कराभिरवकामऽवकाभिः शर्करामुत्सादेन जिह्वामवक्रन्देन तालुं सरस्वतीं जिह्वाग्रेण ॥ १६ ॥ (घी दही तिल जव और शकर रूप । पञ्चामृत) । पञ्चव्युष्टीरनुपञ्च दुहा गां पञ्चनाम्नीमृतवोऽनु पञ्च । पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरभिलोकमेकम् ॥ १७ ॥ (पञ्चगव्य)। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् । मिश्रीकृत्य । समुद्रादूर्मिर्मधुमा उदारदुपांशुना समऽमृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानामऽमृतस्य नाभिम् ॥१८॥ (कपूर)। त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥१९॥ (सर्वौषधीः) । या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा । मनैनु बभ्रूणामहं शतं धामानि सप्त च ॥ २० ॥ (गन्ध)। गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् । (और फूल) । पुष्पवतीः प्रसुमतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः । ॥ २१ ॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोवि-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

न्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः कालरात्र्यै तालरात्र्यै राज्ञीरात्र्यै शिवरात्र्यै

द्वादश्यां / त्रयोदश्यां "पूर्वे" देवीपुत्रहेरकनाथाय / देवीपुत्रवटुकनाथाय "आग्नेये" त्रिपुरान्तकाय / भूतवलेभ्यः

"दक्षिणे" वेतालराजाय / अग्निवेतालराजाय "नैर्ऋते" अग्निजिह्वाय / वहुखातकेश्वराय "पश्चिमे"

करालाय / स्थानक्षेत्रपालाय "वायवे" कामाख्याय / मङ्गलराजाय "उत्तरे" एकपादाय / योगिनीवलेभ्यः

"ईशाने" भीमरूपिणे / जयक्सेनाय "ऊर्ध्वे" तारकाख्याय / विश्वक्सेनाय "पाताले"

हाटकेश्वराय / तेजाय "मध्ये" राजराजेश्वराय / चण्डाय समस्तशिवरात्रीयागदेवताभ्यः

विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय एकविंशतिस्थानानि नमः ॥ (देवोंको अर्घ दही तिल शहद घी समेत पानी से तृप्ति करनी)। ततो दध्यक्षततिलैरित्थं मध्वाज्यमिश्रितैः। तर्पयेदुदकैर्देवानृषिपूर्वान्सपितृकान् ॥ (अञ्जली करके देवों का ध्यान करना)। गृत्समदस्य गायत्री ॥ विश्वेदेवास आगत। शृण्वताम इमं हवमिदं वर्हिर्निषीदत । (तर्पण करना)। ब्रह्मा तृप्यतां विष्णुस्तृप्यतां रुद्रस्तृप्यतां प्रजापतिस्तृप्यतां वेदास्तृप्यन्तां छन्दांसि तृप्यंतां ऋषयस्तृप्यन्तां तपोधनास्तृप्यन्तां आचार्यास्तृप्यन्तां गन्धर्वास्तृप्यंतां पितराचार्यास्तृप्यन्तां संवत्सराः सावयवास्तृप्यन्तां देवास्तृप्यन्तां अप्सरसस्तृप्यन्तां देवानुगास्तृप्यन्तां नागास्तृप्यन्तां सागरास्तृप्यन्तां पर्वता-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

स्तृप्यन्तां सरितस्तृप्यन्तां तुष्यास्तृप्यन्तां यक्षास्तृप्यन्तां रक्षांसि तृप्यन्तां पिशाचास्तृप्यन्तां सुपर्णास्तृप्यन्तां भूतानि तृप्यन्तां पशवस्तृप्यन्तां वनस्पतयस्तृप्यन्तां ओषधयस्तृप्यन्तां भूतग्रामाश्चतुर्विधास्तृप्यन्तां असुरास्तृप्यन्तां क्रूरास्तृप्यन्तां सर्पास्तृप्यन्तां जम्बुकास्तृप्यन्तां खगास्तृप्यन्तां विद्याधरास्तृप्यन्तां जलाधारास्तृप्यन्तां निराधारास्तृप्यन्तां पापधर्मरतास्तृप्यन्तां सर्वे देवाः सर्वे ग्रहास्तृप्यन्तां यमस्तृप्यतां धर्मराजस्तृप्यतां मृत्युस्तृप्यतां अन्तकस्तृप्यतां वैवस्वतस्तृप्यतां कालस्तृप्यतां सर्वप्राणहरस्तृप्यतां औदुम्बरस्तृप्यतां नीलस्तृप्यतां व्रध्नस्तृप्यतां परमेष्ठिस्तृप्यतां वृकोदरस्तृप्यतां भीमस्तृप्यतां चित्रस्तृप्यतां चित्रगुप्तस्तृप्यतां ॥ (गले मे जञ्जू रखना)। कण्ठोपवीती। (ऋषियोंका ध्यान करना) अग्निर्ऋषिः पावमानः पञ्चजन्यः पुरोहितः, तमीमहे महागयम् ॥ (ऋषियोंको दो दो अञ्जलि करतलसे देना)। सनकस्तृप्यतां तृप्यतां सनन्दनः, सनातनः, सनत्कुमारस्तृप्यतां २ कपिलः, आसुरिः वोढा पञ्चशिखः मरीचिः अत्रिः अङ्गिराः, पुलहः, पुलस्त्यः, भृगुः, क्रतुः, प्रचेताः, वसिष्ठः, नारदस्तृप्यतां तृ[illegible] ॥ (बाहे तरफ जञ्जू रखना) अपसव्येन। (पितरोंका ध्यान करना) उशन्तस्त्व. हवामह उशन्तः समिधीमहि। उशन्नुशन्त आवह पितॄन्हविषे अत्तवे ॥ (तीन तीन जलाञ्जली देना)। कव्यवाडनलः स्वधा येभ्यः स्वधा नमस्तृप्यतां तृप्यतां तृप्यतां, सोमः स्वधा येभ्यः स्वधा नमस्तृ० ३, यमः, अर्यमाः, अग्निष्वात्ताः स्वधा येभ्यः स्वधा नमस्तृप्यन्तां

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

३, वर्हिपदः स्वधायेभ्यः स्वधानमस्तृप्यन्तां ३, हविष्मन्तः, सुकालिनः सोमपाः आज्यपाः वसवः रुद्राः आदित्याः स्वधा येभ्यः स्वधा नमस्तृप्यन्तां ३। देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच। नमः स्वधा च स्वाहा च नित्यमेव भवन्त्विह॥ ॐ तत्सद्ब्रह्माऽद्यतावत्तिथावद्यफाल्गुनमासस्य कृष्णपक्षस्य तिथौ त्रयोदश्यां रविवारान्वितायां पितामुकोऽमुकगोत्रः स्वधा नमस्तृप्यतां ३ पितामहः प्रपितामहः। माता पितामही प्रपितामही। मातामहः प्रमातामहः वृद्धप्रमातामहः। मातामही प्रमातामही वृद्धप्रमातामही। (इसी तरह सब सम्बन्धियोंको पानी देना) मातृपक्षास्तु ये केचिद्ये चान्ये पितृपक्षजाः। गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः। ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः। जलदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम्॥ समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यः हिमपानं स्वधा क्षीरपानं स्वधा मधुपानं स्वधा तिलोदकं स्वधा उदकतर्पणं स्वधा हिमंहिमं रजतंरजतं॥ (दाहीं तर्प जञ्जू करना)। सव्येन। वसन्तायनमः ग्रीष्मायनमः वर्षाभ्योनमः शरदेनमः हेमन्तायनमः शिशिरायनमः षड्ऋतुभ्योनमः। ॐ नमो देवेभ्यः। (गले में जञ्जू)। कण्ठोपवीती। स्वाहा ऋषिभ्यः (बाहे तर्प जञ्जू)। अपसव्येन। स्वधा पितृभ्यः। (दाहे तर्फ जञ्जू)। सव्येन। आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं। जगत्तृप्यतु तृप्यतु तृप्यतु एवमस्तु॥ (सफा पानीसे स्नानद्रव्यों का मलमिटाना)। त्र्यम्बकं यजामहे सुगन्धिं रयिपोषणम्। उर्वारुकमिव बन्धनान्मृत्यो-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

मुक्षीय मामृतात् । शिवरात्रीदेवताभ्यः मन्त्रगुडकं परिकल्पयामि नमः ॥ (बाहे हाथ के तलेमें पानी और अक्षत रखके देवताओंको आलत निकाल के बाहे स्कन्द से फैंकना)॥ रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म । शिशानो अग्निः क्रतुभिः समिद्धः स नो देवः सरिषः पातु नक्तम् । शिवरात्रीदेवताभ्यः आरात्रिकां परिकल्पयामि नमः ॥ (देव के पादों का पानी आंखों को मलना) १ मृड त्वमस्मभ्यं रुद्रैतदस्तु हुतं तव । पशून्नस्माकं मा हिंसीरेतदस्मा अस्तद्धुतम् ॥ शिवरात्रीयागदेवताभ्यो नेत्रस्पर्शनं परिगृह्णामि नमः ॥ (बिठाने के जगाह आसन फूलों से रखना)। आसनाय नमः सिंहासनाय नमः प्रेतासनाय पद्मासनाय नमः वृषभासनाय विचित्रवाहासनाय नमः (द्रव्यों के असम्भवकी माफी मांगकर सफाई और गन्ध अक्षतों से अङ्गराग करना)। रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना । १ । या हस्तिनि द्वीपिनि या हिरण्ये गोष्वश्वेषु पुरुषेष्वऽन्तः । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना । २ । सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना । ३ । या राजन्ये दुन्दुभावायतायामश्वस्य क्रन्दे पुरुषस्य मायौ । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना । (महिम्नः पार आदि स्तोत्र भी पढ कर)। मा नो महान्तमुत मा नो अर्भकं मा न उक्ष-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

न्तमुत मा न उक्षितम् । मा नो वधीः पितरमुत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ शिवरात्रीयागदेवताभ्योऽनुलेपनं परिकल्पयामि नमः । (वस्त्र पहनना) । मा न स्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमि त्वा हवामहे ॥ युवा सुवासाः परिवीत आगात्स उच्छ्रेयान्भवति जायमानः । तं धीरासः कवय उन्नयन्ति साध्यो मनसा देवयन्तः ॥ शिवरात्रीदेवताभ्यः वस्त्रं परिकल्पयामि नमः ॥ (जन्जू लगाना) । उप ते स्तोमन्पशुपा इवाकरं रास्वा पितर्मरुतां सुम्नमस्मे । भद्रा हि ते सुमतिर्मृडयत्तमाथाववमव इत्ते वृणीमहे ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः । यज्ञोपवीतमसि यज्ञस्य त्वा उपवीतेन उपनह्यामि ॥ शिवरात्रीदेवताभ्यः यज्ञोपवीतं परिकल्पयामि नमः ॥ (गन्ध चडाना) । आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु । मृडा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम् ॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः कालराज्यै

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

तालरात्र्यै राज्ञिरात्र्यै शिवरात्र्यै "पूर्वे" देवीपुत्रवटुकनाथाय "आग्नेये" भूतवलेभ्यः "दक्षिणे" अग्निवेतालराजाय "नैर्ऋते" वहुखातकेश्वराय "पश्चिमे" स्थानक्षेत्रपालाय "वायवे" मङ्गलराजाय "उत्तरे" योगिनीवलेभ्यः "ईशाने" जयक्सेनाय "ऊर्ध्वे" विश्वक्सेनाय "पाताले" तेजाय "मध्ये" चण्डाय शिवरात्रीदेवताभ्यः विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इह राष्ट्राधिपतये अमुकभैरवाय समालभनं गन्धोनमः ॥ (गन्ध लेप दो के, अर्घ और फूल चढाना) ॥ अग्नोचाम नमो अस्मा अवस्यवः शृण्वन्तु नो हव्यं रुद्रो मरुत्वान् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीउत द्यौः ॥ पुष्पवतीः प्रसुमतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णुवः ॥ महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः कालरात्र्यै तालरात्र्यै राज्ञिरात्र्यै शिवरात्र्यै "पूर्वे" देवीपुत्रवटुकनाथाय "आग्नेये" भूतवलेभ्यः "दक्षिणे" अग्निवेतालराजाय "नैर्ऋते" वहुखातकेश्वराय "पश्चिमे" स्थानक्षेत्रपालाय "वायवे" मङ्गलराजाय "उत्तरे" योगिनीवलेभ्यः "ईशाने" जयक्सेनाय "ऊर्ध्वे" विश्वक्सेनाय "पाताले" तेजाय "मध्ये" चण्डाय शिवरात्रीदेवताभ्यः

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

विष्णुपञ्चायतनदेवताभ्यः अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इह राष्ट्राधिपतये अमुकभैरवाय अर्घो नमः पुष्पं नमः (धूप चढाना) ॥ वयमग्रे धनवन्तः स्यामाऽलं वज्ञायोत दक्षिणायै । ग्रावा, वदेदऽभि सोमस्यांशुमिन्द्रं शिक्षिमिन्दुना सुतेन ॥ धूरसि धूर्व धूर्वन्तं योस्मान्धूर्वति तं धूर्वय वयं धूर्वामस्तं च धूर्व । देवानामसि वह्नितमं सस्नितमं पप्रितमसिष्टतमं देवहुतमं विष्णोः क्रमोस्याहुतमसि हविर्दानं दंहस्व माह्वान्मित्रस्य त्वा चक्षुषा प्रेक्ष उरु त्वा वाताय वसव-स्त्वा धूपयन्तु गायत्रेण च्छन्दसाऽङ्गिरस्वत् रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन च्छन्दसाऽङ्गिरस्वत् । आदित्यास्त्वा धूपयन्तु जागतेन च्छन्दसाऽङ्गिरस्वत् । विश्वे त्वा देवा वैश्वानरा धूपयन्तु आनुष्टु-भेन च्छन्दसाऽङ्गिरस्वत् इन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु । शिवरात्रीदेवताभ्यो धूपं समर्पयामि नमः ॥ (रत्नदीप और कपूर चढाना) रायस्पोषं नो देहि जातवेद ऊर्जो भागं मधुमत्स्यां घृतावत् । दधान यज्ञं सुधनास सोमं यज्ञेन त्वामुपशिक्षेम शक्र ॥ तेजोसि शुक्रमसि ज्योतिरसि धामासि प्रियन्देवानामनाधृष्टं देवयजनं देवताभ्य-स्त्वा देवताभ्यो गृह्णामि यज्ञेभ्यस्त्वा यज्ञियेभ्यो गृह्णामि ॥ शिवरात्रीदेवताभ्यो रत्नदीपं कर्पूरं परिकल्पयामि नमः (चामर करना) ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनो-र्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ "जय सर्व जनाधीश" (इह शिवपूजा की तीन स्तोत्र पढकर) शिवरात्री-देवताभ्यश्चामरं परिकल्पयामि नमः ॥ (फूलों का छत्र

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

चढाना) ॥ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ शिवरात्रीदेवताभ्यः छत्रं परिकल्पयामि नमः ॥ (आईना दिखना) । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतम् ॥ शिवरात्रीदेवताभ्यः आदर्शं परिकल्पयामि नमः ॥ (पानी छोडना) ॥ एताभ्यो देवताभ्यो धूपदीपात्सङ्कल्पसिद्धिरस्तु धूपो नमः दीपो नमः ॥ (कलश को भी वस्त्र या फूल देना) ॥ एताभ्यो देवताभ्यो अर्घो नमः (भाकी लेना) एतासां शिवरात्रीदेवतानामर्घ्यदानाद्यर्चनविधिः सर्वः परिपूर्णोऽस्तु ॥ (दूध और कन्द चढाना) ईशानं त्वा शुश्रुमा वयं धनानां धनपते गोमदग्ने । अश्ववद्भूरि पुष्टं हिरण्यवद्भनवद्देहि मह्यम् ॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ शिवरात्रीदेवताभ्यो मासामधुपर्कं चरुं समर्पयामि नमः ॥ (आलचा सुपारी नार्जील वगैरा ताम्बूल चढाना) ॥ ताम्बूलं विविधैर्द्रव्यैर्नारिकेलादिभिर्युतम् । मुखशुद्धिकरं स्वामिन्गृहाण वरदो भव । शिवरात्रीदेवताभ्यस्ताम्बूलं समर्पयामि नमः (आधा अक्षत देना) । दुहान्ते द्यौः पृथिवी पयोऽजगरस्त्वा सोदको निसर्पतु । प्रजापतिनात्मनाग्नीषोऽरिक्तो स आत्मा ॥ ॐ नमो भैरवेशाय वटुकभैरव सानुग भगवन् प्रसीद ॥ (दीनाक्रन्दनस्तोत्रादि पढकर साष्टाङ्ग प्रणाम करना) ॥ उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा चोरसा वचसा मनसा च नमस्कारं करोमि

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

नमः ॥ (कमी या अधिक होनी की माफी माङ्गना) ॥ अन्नंनमः अन्नंनमः आज्यमाज्यमद्य दिने अद्य यथासङ्कल्पाप्तिसिद्धिरस्तु अङ्गहीनं क्रियाहीनं विधिहीनं द्रव्यहीनं मन्त्रहीनं च यद्गतं तत्सर्वमच्छिद्रं सम्पूर्णमस्तु एवमस्तु ॥ (हाथ से पात्र में वापस किये पानीसे आचमन देना) । शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः । शिवरात्रीदेवताभ्योऽपोशानं नमः आचमनीयं नमः । (और हाथ से पात्र में उलटाये पानी में तिल और दक्षिणा देना) । पुनः, शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः । शिवरात्रीदेवताभ्यो दक्षिणायैतिलहिरण्यरजतनिष्क्रयं ददामि । एता देवताः सदक्षिणा अनेन प्रीयन्तां प्रीताः सन्तु ॥ (कलश को दो फूल चढाना) । ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः, दिवीव चक्षुराततम् ॥ १ ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते, विष्णोर्यत्परमं पदम् ॥ २ ॥ (बटुक को फूल) ॥ नाथं नाथं त्रिभुवननाथं भूतिसितं त्रिनयनं त्रिशूलधरम् । उपवीतीकृतभोगिनमिन्दुकलाशेखरं वन्दे ॥ (अत्र नित्यकर्म जपपाठादि करके व्याहृति करना) ।

अथ व्याहृतिः ॥

(अग्नि जलाकर उसके ईशानकोणे पर विष्टर तिल अक्षत फूल और पानीवाला प्रणीतपात्र रख के उस में और अग्निमेंभी तिल छोडना) । पात्रं तिलाक्षतैर्मिश्रं कुसुमोदकविष्टरैः । अग्नेरैशानदिग्भागे

Hawan

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

प्रणीतमभिधीयते ॥ प्रणीतं नैर्ऋते स्थाप्यं स विष्णुर्नात्र संशयः ॥ (पात्र में तीन दफा फूल छोडना) ॥ सं वः सृजामीति द्वाभ्यां पुष्पाणां त्रितयं क्षिपेत् ॥ सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः ॥ १ ॥ संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः ॥ २ ॥ संप्रियावः प्रियास्तन्वः संप्रिया हृदयानि वः । आत्मा वो अस्तु संप्रियः संप्रियास्तन्वो मम ॥ ३ ॥ (दो दर्भकाण्ड जलाई दाहे तरफ छोडना) । निर्दग्धं रक्षो निर्दग्धारातिरपाग्ने । अग्निमामादं जहि निष्क्रव्यादं सीधा देवयजनं वह ॥ (प्राणायाम करके अग्नि को प्रणीत पात्र में से नौ छिडकियां देना) ॥ ऋतं त्वा सत्येन परिसमूह्यामि ॥ १ ॥ सत्यं त्वर्तेन परिसमूह्यामि ॥ २ ॥ ऋतसत्याभ्यां त्वा परिसमूह्यामि ॥ ३ ॥ ऋतं त्वा सत्येन पर्युक्षामि ॥ ४ ॥ सत्यं त्वर्तेन पर्युक्षामि ॥ ५ ॥ ऋतसत्याभ्यां त्वा पर्युक्षामि ॥ ६ ॥ ऋतं त्वा सत्येन परिपिञ्चामि ॥ ७ ॥ सत्यं त्वर्तेन परिपिञ्चामि ॥ ८ ॥ ऋतसत्याभ्यां त्वा परिपिञ्चामि ॥ ९ ॥ (अग्नि के चार दिशाओं के पूर्व और उत्तर अग्रवाला के चार दर्भकाण्ड छोडना) । यज्ञस्य सन्ततिरसि यज्ञस्य त्वा सन्तत्यै स्तृणामि । पुरस्तात्, दक्षिणतः, उत्तरतः, पश्चात्, इति स्तरैः ॥ (अग्नि को गन्ध फूल लगाना) । अग्नये शुकारूढाय स्वाहासहिताय त्रिनेत्राय तेजोरूपाय समालभनं गन्धोनमः अर्घोनमः पुष्पं नमः ॥ (दर्भकाण्ड दो जलाकर यवा, तिल, घी, दही, मिठास, रूप पञ्चामृत हवि में लगाना) । इदं हविः प्रजननं मे अस्तु

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

दशवीरं सर्वगणं स्वस्तये आत्मसनि प्रजासनि पशुसनि अभयसनि लोकसनि अग्निः प्रजां बहुलां मे करोतु अन्नं पयो रेतो अस्मासु दत्त घृतेन संलिप्य भृतमन्नं भृतमभिघार्य ॥ (महागायत्रीका ध्यान करके अग्निमें फूल चढाना) । मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वात्मवर्णात्मिकाम् । गायत्रीं वरदाभयाङ्कुशकरां शूलं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥ आयातु वरदा देवी त्र्यक्षरा ब्रह्मवादिनी । गायत्रि च्छन्दसां मातर्ब्रह्मयोने नमोस्तु ते ॥ २ ॥ (आहुती अनचक्रन्न देना)। "महाव्याहृतयः प्रजापतेः" । ॐ अग्नये स्वाहा ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ भूर्भुवः स्वः स्वाहा। ॐ भूः स्वाहा ॐ भुवः स्वाहा ॐ स्वः स्वाहा ॐ महः स्वाहा ॐ जनः स्वाहा ॐ तपः स्वाहा ॐ सत्यं स्वाहा ॐ भूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ३ ॥ (फूल चढाना)। अश्वमेधे घोराणामार्षम् । (आहुति देना)। द्रष्ट्रेनम, उपद्रष्ट्रे नमोऽनुद्रष्ट्रेनमः, ख्यात्रेनम, उपख्यात्रेनमो, तुक्शाब्लेनमः, शृण्वतेनम, उपशृण्वतेनमः, सते नमोऽसते नमो, जाताय नमो, जनिष्यमाणाय नमो, भूताय नमो, भविष्यते नमश्चक्षुषे नमः, श्रोत्राय नमो, मनसे नमो, वाचे नमो, ब्रह्मणे नमः शान्ताय नमस्तपसे नमः ॥ भूतं भव्यं भविष्यद्वषट्स्वाहा नम, ऋक्साम यजुर्वषट् स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट् स्वाहा नमः, पृथिव्यन्तरिक्षं द्यौर्वषट् स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट् स्वाहा नमः, पिता पुत्रः पौत्रो वषट्

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

स्वाहा नमः, प्राणो व्यानोऽपानो वषट् स्वाहा नमो, भूर्भुवः स्वर्वषट् स्वाहा नमः ॥ यो विश्वचक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । संबाहुभ्यां धमते संपतत्रैर्द्यावाभूमी जनयन्देव एकः ॥ आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामऽस्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां, दोग्ध्री धेनुर्वोढाऽनड्वानाऽऽशुः सप्तिर्जिष्णूरथेष्ठः पुरन्ध्रिर्योषा सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवतीर्न ओषधयः पच्यतां योगक्षेमो नः कल्पताम् ॥ (फूल चढाना) । चतुर्भुजामऽर्कसहस्रकोटिभां त्रिलोचनां हारकिरीटशोभिताम् । चतुर्मुखाङ्कोपगतां महोज्ज्वलां वेदेश्वरीं पञ्चमुखीं नमाम्यहम् ॥ (आहुती देना) । ॐ ओजोसि सहोसि बलमसि भ्राजोसि देवानान्धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूः ॥ ॐ देवाश्च वा असुराश्च संय्यन्ता आसंस्तान्गायत्र्याऽन्तरातिष्ठदोजो वै वीर्यमन्नाद्यं परिगृह्य संवत्सरो वा येनान्सोऽन्तरातिष्ठचतुर्विंशतिर्गायत्र्या अक्षराणि चतुर्विंशतिः संवत्सरस्यार्धमासास्ते विदुर्यतरान्वा इयमुपवर्त्स्यति त इदं भविष्यन्तीति तं व्यहूयन्तदासीत्यसुरा-ह्वयन् विश्वकर्मन्निति देवासस्तान्यतरांश्च नोपवर्तत ते देवा एतद्यजुरपश्यन्नोजोसि सहोसि बलमसि भ्राजोसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति सा देवानुपावर्तत ततो देवा अभवन् पराऽसुरा अभवन्नाग्नेयमष्टा-कपालं निर्वापेद्भ्रातृव्यवान्वा स्पर्धमानो वा तमाऽसाद्यैतैर्यजु-र्भिरभिमृशेदोजो वै वीर्यं संवत्सर ओज एव वीर्यं भ्रातृव्यस्य

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

वृक्षे स निर्वीर्यः पराभवति सैषा गायत्री नामैष्टे रथो आहुः क्षेत्रस्य संवर्ग इति ॥ श्रीमहागायत्र्यै स्वाहा सावित्र्यै स्वाहा सरस्वत्यै स्वाहा । (तर्पण करना) । अनेन मन्त्रहोमेन आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थं शिवरात्रीव्रत-निमित्तं महागायत्रीदेवीसन्तोषणार्थं महागायत्री सावित्री सरस्वती प्रीयतां प्रीताऽस्तु । (आहुती देना) । अध्वर्योऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय । विश्वस्मै भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद्देव यज्ञम् ॥ १ ॥ इहैवैधि मा पच्योष्ठाः पर्वता इवाविचाचलत् । इन्द्र इहैव ध्रुवस्तिष्ठेह यज्ञमुधारय ॥ २ ॥ इममिन्द्रो अदीधरद्ध्रुवं ध्रुवेण हविषा हविः । तस्मै सोमो अधिब्रुवत्त्वसा उ ब्रह्मणस्पतिः ॥ ३ ॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे । ध्रुवं विश्व-मिदं जगद्ध्रुवो राजा विशामसि ॥ ४ ॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ ५ ॥ बडित्था पर्वतानां क्षेत्रं बिभर्षि पृथिवि । प्रया भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ ६ ॥ निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत्क्रियते किञ्चनारे महामर्कं मघवंश्चित्रमर्च ॥ १ ॥ कुमारं माता युवतिः समुब्धं गुहा बिभर्ति न ददाति पित्रे । अनीकमस्य नमिमज्जनासः पुरः पश्यन्ति निहितमरतौ ॥ २ ॥ अश्वपूर्वां रथमध्यां हस्ति-नादप्रमोदिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ ३ ॥ इयं शुष्मेभिर्बिसखा इवारुजत्सानुगिरीणान्तविषेभिरूर्मिभिः । पा-रावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः ॥ ४ ॥

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ५ ॥ विश्वकर्मा विश्वदेवो विश्वजिद्विश्वदर्शिनः । ते त्वा घृतस्य धारया श्रैष्ठाय समसृपत ॥ ६ ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ ७ ॥ प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वऽधि क्षियन्ति भुवनानि विश्वा ॥ ८ ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः ॥ ९ ॥ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ १० ॥ इषे त्वोर्जे त्वा वायवः स्थोऽपायवः स्थ देवो वः सविता प्रार्पयतु । श्रेष्ठतमाय कर्मणे ॥ ११ ॥ अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ १२ ॥ शन्नो देवीरभीष्टय आपो भवन्तु पीतये । शंय्योरभि स्रवन्तु नः ॥ १३ ॥ आहं पितृन्सुविदत्रां अवित्सि न पातं च विक्रमणं च विष्णोः । बर्हिषदो ये सुधया स्वतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ १४ ॥ वषट्ते विष्ण वास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् । वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ "फाल्गुने" शक्तिसहिताय चक्रिणे स्वाहा । क्रियासहिताय दामोदराय स्वाहा दुर्गायै स्वाहा त्र्यम्बकाय स्वाहा वरुणाय स्वाहा यज्ञपुरुषाय स्वाहा अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः स्वाहा (प्रधान देना) ।

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

रात्रीं प्रपद्ये जननीं सर्वभूतनिवेशिनीम् । भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् । संवेशिनीं संयमनीं ग्रहनक्षत्रमालिनीम् । प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीमहि स्वाहा ॥ कालरात्र्यै स्वाहा तालरात्र्यै स्वाहा राज्ञिरात्र्यै स्वाहा शिवरात्र्यै स्वाहा ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः स्वाहा । क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयिन्त्वा स नो मृडातीदृशे स्वाहा । (पूर्वे) । ॐ ह्रीं श्रीं देवीपुत्रवटुकनाथाय स्वाहा । (आग्नेये) । भूतबलेभ्यः स्वाहा । (दक्षिणे) । अग्निवेतालराजाय स्वाहा । (नैर्ऋते) । बहुखातकेश्वराय स्वाहा । (पश्चिमे) । स्थानक्षेत्रपालाय स्वाहा । (वायवे) । मङ्गलराजाय । (उत्तरे) । योगिनीबलेभ्यः स्वाहा । (ईशाने) । विश्वक्सेनाय स्वाहा । (ऊर्ध्वे) । जयक्सेनाय स्वाहा । (पाताले) । तेजाय । (मध्ये) । चण्डाय स्वाहा । शिवरात्रीयागदेवताभ्यः स्वाहा ॥ (फूल चढाना) ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान्कनककुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥ १ ॥ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् । लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ २ ॥ आनुष्टुभस्य सूक्तस्य त्रिष्टुभन्तस्य देवता । विश्वात्मा पुरुषः साक्षादृषिर्नारायणः स्मृतः ॥ ३ ॥ पुरुषमेधः पुरुषस्य नारायणस्यार्षम् । (आहुति देना) ।

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो-
वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदं सर्वं यद्भूतं यच्च
भव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥ एता-
वानस्य महिमाऽतो ज्यायांश्च पूरुषः । पादोस्य विश्वा भूतानि
त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादो-
स्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥
तस्माद्विराडजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत
पश्चाद्भूमिमथो पुरः ॥ ५ ॥ यत्पुरुषेण हविषा देवा यज्ञ-
मतन्वत । वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥६॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजन्त
साध्या ऋषयश्च ये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदा-
ज्यम् । पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥ ८ ॥
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे
तस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मादश्वा अजायन्त येकेचो-
भयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्य कौ
बाहू का ऊरू पादा उच्येते ॥११॥ ब्राह्मणोस्य मुखमासीद्बाहू
राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत
॥ १२ ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादि-
न्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥ नाभ्या आसीदन्त-
रिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा
लोकानकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः
कृताः । देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥ १५ ॥

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥ (फूल चढाना) । मातर्नमामि कमले कमलायताक्षि श्रीविष्णुहृत्कमलवासिनि विश्वमातः । क्षीरोदजे कमलकोमलगर्भगौरि लक्ष्मि प्रसीद सततं नमतां शरण्ये । (आहुति देना) । रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना ॥ १ ॥ या हस्तिनि द्वीपिनि या हिरण्ये गोष्वश्वेषु पुरुषेष्वन्तः । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना ॥ २ ॥ सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना ॥ ३ ॥ या राजन्ये दुन्दुभावायतायामश्वस्य क्रन्दे पुरुषस्य मायौ । इन्द्रं या देवी सुभगा जजान सेयमगाद्वर्चसा संविदाना ॥ ४ ॥ प्रियं मां कुरु देवेषु प्रियं राजसु मा कुरु । प्रियं विश्वेषु गोप्त्रेषु मयि देहि रुचारुचिम् ॥ ५ ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ भगवते वासुदेवाय स्वाहा सङ्कर्षणाय स्वाहा प्रद्युम्नाय स्वाहा अनिरुद्धाय स्वाहा सत्याय स्वाहा पुरुषाय स्वाहा अच्युताय स्वाहा माधवाय स्वाहा गोविन्दाय स्वाहा सहस्रनाम्नेविष्णवे स्वाहा लक्ष्मीसहिताय नारायणाय स्वाहा ॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु देवाः स्वाहा ॥ भवाय

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

देवाय स्वाहा शर्वायदेवाय स्वाहा रुद्रायदेवाय स्वाहा पशुपतयेदेवाय स्वाहा उग्रायदेवाय स्वाहा महादेवाय स्वाहा भीमायदेवाय स्वाहा ईशानायदेवाय स्वाहा पार्वतीसहिताय-परमेश्वराय स्वाहा ॥ गणानान्त्वा गणपतिं हवामहे कविं-कवीनामुपम श्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीद सादनम् ॥ विनायकाय स्वाहा एकदन्ताय-स्वाहा कृष्णपिङ्गलाय स्वाहा गजाननाय स्वाहा लम्बोदराय स्वाहा भालचन्द्राय स्वाहा हेरम्बाय स्वाहा आखुरथाय स्वाहा विघ्नेशाय स्वाहा विघ्नभक्ष्याय स्वाहा वल्लभासहिताय श्रीमहा-गणेशाय स्वाहा ॥ चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥ ह्रांह्रींसः सूर्याय स्वाहा सप्ताश्वाय स्वाहा अनश्वाय स्वाहा एकाश्वाय स्वाहा नीलाश्वाय स्वाहा ग्रत्यक्षदेवाय स्वाहा परमार्थसाराय तेजोरूपाय स्वाहा प्रभासहिताय आदित्याय स्वाहा ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ उमायै स्वाहा कामायै स्वाहा चार्वङ्ग्यै स्वाहा टङ्कधारिण्यै स्वाहा तारायै स्वाहा पार्वत्यै स्वाहा यक्षिण्यै स्वाहा श्रीशारिकाभगवत्यै स्वाहा श्रीशारदाभगवत्यै स्वाहा श्रीमहाराज्ञी भगवत्यै स्वाहा श्रीज्वालाभगवत्यै स्वाहा व्रीडाभगवत्यै स्वाहा वैखरीभगवत्यै स्वाहा वितस्ताभगवत्यै स्वाहा गङ्गाभगवत्यै स्वाहा यमुनाभगवत्यै स्वाहा कालिकाभगवत्यै स्वाहा सिद्धलक्ष्म्यै स्वाहा महालक्ष्म्यै स्वाहा महात्रिपुरसुन्दर्यै स्वाहा सहस्र-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

नारूयैदेव्यैभगवत्यै स्वाहा ॥ ॐ यत इन्द्र भयामहे ततो नो अभयङ्कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि स्वाहा ॥ अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय स्वाहा । (इष्टदेव का दशांश देना) । हेरकादिभ्यः स्वाहा वटुकादिभ्यः स्वाहा ॥ यौ ते श्वानौ यमरक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ । ताभ्यामेनं परिदेहि राजन्स्वस्ति चास्मा अनमीवं च देहि ॥ यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥ मुञ्चामि त्वा हविषा जीवनायकमज्ञातयक्ष्मादुत राजयक्ष्मात् । ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्रमुमुक्तमेनम् ॥ अङ्गादङ्गाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि । यक्ष्मं सर्वस्मादा-त्मनस्तमिमं विवृधामि ते ॥ ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ॥३॥ ॐतद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वेदेवा नातिविध्यन्ति शूराः । तन्नस्त्रायतां तन्वः सर्वतो महदायुष्मन्तो जरामुपग-च्छेम जीवाः स्वाहा । (तर्पण करना) । अनेन मन्त्रहोमेन आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं श्रीशिवरात्री-व्रतनिमित्तं महागणपतिः कुमारः श्रीः सरस्वती लक्ष्मीः विश्वकर्मा द्वार्देवताः प्रजापतिः ब्रह्मा कलशदेवताः ब्रह्मविष्णु-महेश्वरदेवताः चातुर्वेदेश्वराः सानुचराः "फाल्गुने" शक्ति-सहितश्चक्री क्रियासहितो गोविन्दः दुर्गा त्र्यम्बकः वरुणः यज्ञ-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

पुरुषः अग्निष्वात्तादयः पितृगणदेवताः कालरात्री तालरात्री राज्ञिरात्री शिवरात्री "पूर्वे" देवीपुत्रवटुकनाथः "आग्नेये" भूतबलाः "दक्षिणे" अग्निवेतालराजः "नैर्ऋते" बहुखातकेश्वरः "पश्चिमे" स्थानक्षेत्रपालः "वायवे" मङ्गलराजः "उत्तरे" योगिनीबलाः "ईशाने" विश्वक्सेनः "ऊर्ध्वे" जयक्सेनः "पाताले" तेजः "मध्ये" चण्डः शिवरात्रीयागदेवताः वासुदेवः लक्ष्मीसहितो नारायणः भवोदेवः पार्वतीसहितः परमेश्वरः विनायकः वल्लभासहितः महागणेशः ह्रांह्रींसः सूर्यः प्रभासहित आदित्यः अमा कामा चार्वङ्गी टङ्कधारिणी तारा पार्वती यक्षिणी श्रीशारिकाभगवती श्रीशारदा श्रीज्वाला श्रीमहाराज्ञी त्रिपुरसुन्दरी सहस्रनाम्नी भगवती अभयङ्करीदेवी क्षेमङ्करी-भवानी सर्वशत्रुघातिनी इहराष्ट्राधिपतिरस्मुकभैरवः पञ्चामृत-होमेन प्रीयन्तां प्रीताः सन्तु ॥ इति व्याहृतिः ॥ (अब वैश्वदेवकी विधि है) ॥

अथ वैश्वदेवम् ॥

(पकाए हुई अन्न या रूटी घीयुक्तको जुलाई हुई दो दर्भकाण्ड लगाना) ॥ वैश्वदेवस्य सिद्धस्य सर्वतोऽग्र्यस्य अन्नस्य जुहोतिपाकस्य घृतेन संलिप्य यजमाना[illegible] स्वस्त्यस्तु भृतमभिघार्य ॥ (उससे अग्निके उत्तरभाग में प्रथम, दक्षिणभाग में दूसरी आहुति देकर उन में [illegible] आहुति देना) ॥ "आदौ" अग्नये स्वाहा "इत्युत्तरतः" । सोमाय स्वाहा "इति दक्षिणतः" ॥ "तयोर्मध्ये" मित्राय स्वाहा वरुणाय स्वाहा इन्द्राय स्वाहा इन्द्राग्निभ्यां स्वाहा विश्वेभ्योदेवेभ्यः स्वाहा

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

प्रजापतये स्वाहा अनुमत्यै स्वाहा धान्वन्तरये स्वाहा वास्तोष्पतये स्वाहा वासुदेवाय स्वाहा सङ्कर्षणाय स्वाहा प्रद्युम्नाय स्वाहा अनिरुद्धाय स्वाहा सत्याय स्वाहा पुरुषाय स्वाहा अच्युताय स्वाहा माधवायस्वाहा गोविन्दायस्वाहा सहस्रनाम्ने विष्णवे लक्ष्मी-सहितायनारायणायस्वाहा । (सबसलोनयुक्त अन्नका वान्धवसहित नैवेद्य चढाना)। अमृतेशमुद्रया अमृती-कृत्य । अमृतमस्तु अमृतायतां नैवेद्यं सावित्राणि सावित्रस्य देवस्य त्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यां पुष्णोहस्ताभ्यामाददे । महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वारदेवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहे-श्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय "फाल्गुने" शक्तिसहिताय चक्रिणे, क्रियासहिताय गोविन्दाय दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणदेवताभ्यः कालरात्र्यै तालरात्र्यै रात्रिरात्र्यै शिवरात्र्यै "पूर्वे" देवीपुत्रवटुकनाथाय "आग्नेये" भूतबलेभ्यः "दक्षिणे" अग्निवेतालराजाय "नैर्ऋते" बहुखातकेश्वराय "पश्चिमे" स्थानक्षेत्रपालाय "वायवे" मङ्गलराजाय "उत्तरे" योगिनीब-लेभ्यः "ईशाने" विष्वक्सेनाय "ऊर्ध्वे" जयक्सेनाय "पाताले" तेजाय "मध्ये" चण्डाय शिवरात्रीदेवताभ्यः । भगवते वासुदेवाय सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय सत्याय पुरुषाय अच्युताय माधवाय गोविन्दाय सहस्रनाम्ने विष्णवे लक्ष्मीसहि-तायनारायणाय । भवायदेवाय शर्वायदेवाय रुद्रायदेवाय पशुपतयेदेवाय उग्रायदेवाय भीमायदेवाय महादेवाय ईशाना-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

यदेवाय ईश्वरायदेवाय उमासहितायशिवाय पार्वतीसहिताय परमेश्वराय । विनायकाय एकदन्ताय कृष्णपिङ्गलाय गजाननाय लम्बोदराय भालचन्द्राय हेरम्बाय आखुरथाय विघ्नेशाय विघ्नभक्ष्याय वल्लभासहिताय श्रीमहागणेशाय । क्लींक्लांकुमाराय षण्मुखाय मयूरवाहनाय सेनाधिपतये कुमाराय । ह्रांह्रींसः सूर्याय सप्ताश्वाय अनश्वाय एकाश्वाय नीलाश्वाय प्रत्यक्षदेवाय परमार्थसाराय प्रभासहिताय आदित्याय । भगवत्यै उमायै कामायै चार्वङ्ग्यै टङ्कधारिण्यै तारायै पार्वत्यै यक्षिण्यै श्रीशारिकाभगवत्यै श्रीशारदाभगवत्यै श्रीमहाराज्ञीभगवत्यै श्रीज्वालाभगवत्यै श्रीडाभगवत्यै वैखरीभगवत्यै वितस्ताभगवत्यै गङ्गाभगवत्यै यमुनाभगवत्यै कालिकाभगवत्यै सिद्धलक्ष्म्यै महालक्ष्म्यै महात्रिपुरसुन्दर्यै सहस्रनाम्न्यैदेव्यैभवान्यै । अभयङ्करीदेव्यै क्षेमङ्करीभवान्यै सर्वशत्रुघातिन्यै इहराष्ट्राधिपतये अमुकभैरवाय । इन्द्राय वज्रहस्ताय अग्नये शक्तिहस्ताय यमाय दण्डहस्ताय नैर्ऋतयेखड्गहस्ताय वरुणाय पाशहस्ताय वायवे ध्वजहस्ताय कुबेराय गदाहस्ताय ईशानाय त्रिशूलहस्ताय ब्रह्मणे पद्महस्ताय विष्णवे चक्रहस्ताय अनन्तादिभ्योऽष्टाभ्यः कुलनागदेवताभ्यः । अग्न्यादित्याभ्यां वरुणचन्द्रमोभ्यां कुमारभौमाभ्यां विष्णुबुधाभ्यां इन्द्राबृहस्पतिभ्यां सरस्वतीशुक्राभ्यां प्रजापतिशनैश्चराभ्यां गणपतिराहुभ्यां रुद्रकेतुभ्यां ब्रह्मध्रुवाभ्यां अनन्तागस्त्याभ्यां ब्रह्मणे कूर्माय ध्रुवाय अनन्ताय हरये लक्ष्म्यै कमलायै शिख्यादिभ्यःपञ्चचत्वारिंशद्वास्तोष्पतिदेवताभ्यः । ब्राह्म्यादिभ्योमातृभ्यः गौर्यादिभ्योमातृभ्यः ललितादिभ्योमातृभ्यः दुर्गा

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

क्षेत्रगणेशदेवताभ्यः राकादेवताभ्यः त्रिकादेवताभ्यः सिनीवा-
लीदेवताभ्यः यामीदेवतायः रौद्रीदेवताभ्यः वारुणीदेवताभ्यः
गार्हस्पत्यदेवताभ्यः ॐभूर्देवताभ्यः ॐभुवःदेवताभ्यः ॐस्वर्दे-
वताभ्यः ॐभूर्भुवःस्वर्देवताभ्यः। अखण्डब्रह्माण्डयागदेवताभ्यः
भूर्म्यः उपभूर्म्यः महागायत्र्यै सावित्र्यै सरस्वत्यै हेरुकादिभ्यो
वटुकादिभ्यः ॥ उत्पन्नममृतं दिव्यं प्राक्क्षीरोदधिमन्थनात् ।
अन्नमृतरूपेण नैवेद्यं प्रतिगृह्यताम् । ॐतत्सद्ब्रह्म अद्यतावत्ति-
थावद्य फाल्गुनमासस्य कृष्णपक्षस्य तिथावमुकायामात्मनो वा-
ङ्मनःकायोपार्जितपापनिवारणार्थं शिवरात्रीव्रतनिमित्तमोंनमो
नैवेद्यं निवेदयामिनमः ॥ (पूर्वकेतरफ अग्रवाले कुशा
धरतीपर बिछाना) पूर्वाग्रान्दर्भानास्तीर्य । (उस पर
आग्नेयीकोणसे लैनमें तीन २ नैर्ऋतीकोण तक और
उपर उपर नैर्ऋतसे वायुकोण तक लैनमें तीन २ ऐसी
छत्तीस देवोंका बलि देना) ॥ तक्षायनमः, उपतक्षाय-
नमः, अम्बानामासि नमस्ते, दुलानामासि नमस्ते, नितत्नी-
नामासि नमस्ते, चुपनीकानामासि नमस्ते, अभ्रयन्तीनामासि
नमस्ते, मेघयन्तीनामासि नमस्ते, वर्षयन्तीनामासि नमस्ते,
नन्दिनि नमस्ते, १० सुभगे नमस्ते; सु[illegible]लि नमस्ते, भद्र-
ङ्करि नमस्ते, श्रियै हिरण्यकेश्यैनमः, वनस्पतिभ्योनमः, १५
धर्मायनमः, अधर्मायनमः, मृत्यवेनमः, मरुद्भ्योनमः, वरुणा-
यनमः, विष्णवेनमः, २१ वैश्रवणायराज्ञेनमः, भूतेभ्योनमः,
इन्द्रायनमः, इन्द्रपुरुषेभ्योनमः, २५ यमायनमः, यमपुरुषेभ्यो-
नमः, सोमायनमः, सोमपुरुषेभ्योनमः, वरुणायनमः, ३० वरुण-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

पुरुषेभ्योनमः, ब्रह्मणेनमः, ब्रह्मपुरुषेभ्योनमः, "ऊर्ध्वं" आका-
शायनमः "स्थण्डिले" दिवश्चरेभ्योभूतेभ्योनमः नक्तश्चरेभ्यो-
भूतेभ्योनमः ३६ षट्त्रिंशत्तक्षादिभ्योऽन्नंनमः आचमनीयंनमः ॥
(बाहेतर्फ जञ्जू करना)। अपसव्येन (दाहे तर्फ अग्रवाले
दर्भ विछावना)। दक्षिणाग्रान्दर्भानास्तीर्य ॥ (उनपर
तिल और पानीसे मार्जन करना) समस्तमातापितृभ्यो
द्वादशदैवतेभ्यः पितृभ्यो भूपृष्ठे दर्भास्तरणे तिलोदकेन अव-
नेजनं स्वधा ॥ (उसपर अंगूठ फिरावना) ॥ उशन्तस्त्वा
हवामह उशन्तः समिधीमहि। उशन्नुशत आवह पितॄन्हविषे
अत्तवे (तिल पानी दूध दीप धूप अन्न घी और शहद्
यह आठ द्रव्य पितरोंका अन्नहै)॥ तिलास्तोयं तथा क्षीरं
दीपधूपौ बलिस्तथा। मधुसर्पिःसमायुक्तमष्टाङ्गमन्नसम्भवम् ॥
(बाहे घोठना धरतीपर डकाना)। वामजानुं भूमौ
निधाय। पितरोंको मन्त्र व नाम उचारके अन्न देना)
देवताभ्यः पितृभ्यश्च महायोगिभ्यएवच। नमः स्वधा च
स्वाहा च नित्यमेव भवन्त्विह ॥ तत्सद्ब्रह्म अद्यतावत्तिथौ अद्य
फाल्गुनमासस्य कृष्णपक्षस्य तिथौ अमुकायां अमुकवारान्वि-
तायां आत्मनो वाङ्मनः कायोपार्जितपापनिवारणार्थं पितः
"अमुक अमुकगोत्र एतत्ते अन्नं ये च त्वानु। (इसी तरह
पुरुषोंको)। पितामह "अमुक०" प्रपितामह "अमु०"। मातः
"अमुके अमुकगोत्रि एतत्ते अन्नं याश्चत्वाऽनु"। (इसी तरह
औरतोंको) पितामहि "अमुके" प्रपितामहि। मातामह
"अमुक"। प्रमातामह। वृद्धप्रमातामह। मातामहि "अमुके"

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

प्रमातामहि । वृद्धप्रमातामहि ॥ (इसी तरह और सम्बन्धियों को भी अन्न वगैरा देना) । भ्रातः । "एतत्ते अन्नं"। मातुल "एतत्ते अन्नं" । इत्थं सर्वान्सम्बन्धिनश्च तर्पयेत् ॥ मातृपक्ष्यास्तु ये केचिद्येचान्ये पितृपक्षजाः । गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः । ये प्रेतभावमापन्ना येचान्ये श्राद्धवर्जिताः । अन्नदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम् । समस्तमातापितृभ्यो द्वादशदेवतेभ्यः पितृभ्योऽन्नं स्वधा । (लेप मिटाना) अन्नलेपं निवारयेत् ॥ (गन्ध वगैरा चडाना) । "समस्तमातापितृभ्यः" समालभनं गन्धः स्वधा । "समस्त" अर्घ्यः स्वधा । पुष्पंस्वधा "समस्त०" दीपः स्वधा धूपः स्वधा "समस्तमा" भक्ष्यभोज्यफलमूलबलिनैवेद्यमाऽऽहारादि अन्नं स्वधा "समस्त" तिलमधुमिश्रमुदकपात्रमाचमनीयं जलं स्वधा । "समस्त" हिमपानंस्वधा "स०" क्षीरपानंस्वधा "समस्तमा" मधुपानंस्वधा "सम" तिलोदकंस्वधा "समस्तमातापितृभ्यः" उदकतर्पणंस्वधा हिमंहिमं रजतंरजतं । (दाहे जनू करना) । सव्येन । (तर्पण) । वसन्तायनमः ग्रीष्मायनमः वर्षाभ्योनमः शरदेनमः हेमन्तायनमः शिशिरायनमः षड्ऋतुभ्योनमः । (अग्निके ईशानकोनपर अन्नकी आहुति देकर दोनू हाथ दोना) । अग्नये स्विष्टकृते स्वाहा । हस्तौ प्रक्षाल्य । (प्राणायाम करना) । "प्राणायामः" । (अग्निको तीन वार छिडकना) । ऋतंत्वा सत्येन विमुञ्चामि १ सत्यं त्वर्तेन विमुञ्चामि २ ऋतसत्याभ्यां त्वा विमुञ्चामि ॥ ३ ॥ (अग्न के आस्तरण छोडे होई दर्भा उठाना) । यज्ञस्य सन्त-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

तिरसि यज्ञस्य त्वा सन्तत्यै नयामि ॥ (अग्निको फूलोंसे आशीर्वाद मांगना)। धर्मं देहि धनंदेहि पुत्रपौत्रांश्च देहि मे । आयुरारोग्यमैश्वर्यं देहि मे हव्यवाहन ॥ १ ॥ भक्तिं देहि श्रियं देहि सुखं देहि स्वतन्त्रताम् । देहि भोगं च मोक्षं च मनोभिलषितं तथा ॥ २ ॥ गच्छगच्छ सुरश्रेष्ठ ब्रह्मविष्णुमहेश्वराः । यत्र देवालयाः सर्वे तत्र गच्छ हुताशन ॥ ३ ॥ तेजोसि तेजो मयि देहि । (अपने तर्फ ज्योति लेके अग्निके रुकसत देना)। "इत्यात्मानं देहि" भगवन् सन्निधत्सु ॥ (धरतीपर यक्ष्म रोगराजको बल देना)। भगवन् यक्ष्म एतत्तेऽन्नंनमः एतत्ते आचमनीयंनमः । (गले में जञ्जू रखके सनकादि सिद्धोंको बल हाथके तलेसे छोडना)। कण्ठोपवीती । हन्त मनुष्येभ्यः । सनकादिभ्यऋषिभ्यः अन्नंनमः । आचमनीयंनमः ॥ (दाहें जञ्जू रखके योगिनियोंका ध्यान करके बल । कश्मीरभाषया "चोठ" रखना)। सव्येन । या काचिद्योगिनी रौद्रा सौम्या घोरतरा परा । खेचरी भूचरी रामा तुष्टा भवतु मे सदा ॥ आकाशमातृभ्योऽन्नंनमः समालभनंगन्धोनमः अर्घोनमः पुष्पंनमः ॥ (धरतीपर और जीवोंकी तृप्ति अन्नसे देनी) ॥ ततो गोग्रासादि । सौरभेय्याः सर्वहिताः पवित्राः पुण्यराशयः । प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः । "गोभ्योन्नंनमः" । ऐन्द्रवारुणवायव्या याम्या नैर्ऋतिकाश्चये । वायसाः प्रतिगृह्णन्तु इमं पिण्डं मयोद्धृतम् । "काकेभ्योऽन्नंनमः" । श्वानौ द्वौ श्याव-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

शबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिण्डं प्रदास्यामि स्याता-मेतावहिंसकौ । श्वभ्यः श्वानकेभ्योऽन्नंनमः । (वाहे जञू से) । अपसव्येन । रौरवाधीनसत्वानां प्रेतद्वारनिवासिनाम् । अर्थिनां याचमानानामक्षय्यमुपतिष्ठतु ॥ (दाहे जञूसे) । सव्येन । शुनां च पतितानां च श्वपचां पापरोगिणाम् । वायसानां क्रिमीणां च शनकैर्निक्षिपेद्भुवि ॥ देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः । प्रेताःपिशाचा-स्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् ॥ पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्मणि बद्धबद्धाः । प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु ॥ येषां न माता न पिता न बन्धुर्नैवान्नसिद्धिर्न तथान्नमस्ति । तत्तृप्त-येऽन्नं भुवि दत्तमेतत्ते यान्तु तृप्तिं मुदिता भवन्तु ॥ भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न ततोऽन्यदस्ति । तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम् ॥ चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसङ्घाः । तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु ॥ इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः । भुवि भूतोपकाराय गृही सर्वाश्रयो यतः ॥ (वाहे जञू करके) । अपसव्येन । यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वप्राणहराय च ॥ औदुम्बराय नीलाय प्रद्माय परमेष्ठिने । वृकोदराय भीमाय चित्रगुप्ताय वै नमः ॥ पाशहस्तकृतान्ताय प्रेताधिपतये नमः । श्रीयमराजधर्मराजचित्रगुप्ततृप्तयेऽस्तु ॥ (दाहे जञू से) । सव्येन । (कुलाचार से चन्द्रदेने

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

योग्य अन्न मांस अपूप साथ सप्तधान्य वगैरा द्रव्योंपर अर्घ और पानी पाना) ॥ ये विश्वभाविनो भूता ये च तेष्वऽनुयायिनः । आहरन्तु बलिं तुष्टाः प्रयच्छन्तु शिवं मम ॥ (उड़द आंटके बाराह भैरवों को देना । पहिले वटुकनाथ को पूर्वसे)" ॥ पाशाङ्कुशौ डमरकाद्ययुतौ वहन्तं शुक्लं तथैकवदनं परिनृत्यमानम् । दक्षाननं त्रिनयनं शशिखण्डचूडं ध्यात्वाऽर्चये वटुकमिन्द्रदिशि स्फुरन्तम् ॥ ॐह्रीं-श्रींदेवीपुत्र वटुकनाथभैरव आगच्छ २ रक्षरक्ष सुगन्धिपुष्पदीपधूपान्नपिशितादि क्षेत्रपालबलिं गृह्णगृह्ण वौषट् "पूर्वे वटुकनाथभैरवायनमः ॥ (अग्नेय कोणसे) ॥ भूतबलगणं पूज्यमाग्नेये विघ्ननाशनम् । हसन्तं त्रिमुखं ध्यात्वाऽर्चयेऽहं बलिना प्रभुम् ॥ ॐह्रींश्रींमैंभूतबलभैरव आगच्छ आगच्छ सुगन्धपुष्पदीपधूपान्नपिशितादि बलिं गृह्ण २ वौषट् "आग्नेये' भूतबलेभ्योनमः ॥ (दक्षिण से) ॥ ज्वालाकेशं त्रिनेत्रं भुजगपतिमहाभीषणं मुण्डमालां दैवीं कर्त्रीं कपालं डमरमथ महाघोरशूलं दधानम् । वीणां वाद्यप्रवीणामुरसि विनिहितां वादयन्तं भुजाभ्यां वन्दे वेतालमुग्रदिनकरसदृशं नाट्यलग्नं हसन्तम् ॥ ॐह्रींश्रीं कपिलजटाजूटभारभास्वर अग्निवेतालभैरव एहि एहि अन्नमांसादि बलिं गृह्णगृह्ण वौषट् । दक्षिणे अग्निवेतालराजाय नमः ॥ (नैर्ऋतकोण से) ॥ नैर्ऋते दिशि विभुं च मनोहरं वेदबाहुममरेशवन्दितम् । भक्तवत्सलमजं दयापरं तं नमामि बहुखातकेश्वरम् ॥ ॐह्रींश्रींबहुखातकेश्वरभैरव आगच्छ आगच्छ सुगन्धपुष्पदीपधूपान्न-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

मांसरक्तादिबलिं गृह्णगृह्ण वौषट् । नैर्ऋते वहुखातकेश्वराय नमः ॥ (पश्चिमसे) ॥ स्थानेशश्चतुरास्यषड्भुजमहाभीमस्वभावः करैर्बिभ्राणश्चषकाब्जमुण्डपरशून् खट्वाङ्गकावाङ्कुशान् । मुद्रास्वस्तिक ताण्डवीमऽसिमथो प्रेतासनस्थोऽन्वहं वारुण्यां सुदिशिस्थितो बलयुतो ध्येयः स्वभक्तान्विह ॥ ॐह्रींश्रींक्षांस्थानक्षेत्रपालभैरव आयाहि आयाहि भक्ष्यभोज्यान्न पिशितादिबलिं गृह्ण गृह्ण वौषट् । "पश्चिमे" स्थानक्षेत्रपालाय नमः ॥ (वायुकोणसे) ॥ एकद्वित्रिचतुर्मुखैर्दशचतुःपञ्चैकदोर्भिः कचिन्नानाघोरवरायुधैस्त्रिभुवने ख्यातः सदास्थानतः । भूतैस्ताण्डवमण्डितैः प्रकुपितैर्हर्षान्वितैश्चार्चितो वायव्यां दिशि मङ्गलेश्वर इति ख्यातोऽस्तु सौख्यप्रदः ॥ ॐह्रींश्रींमां मङ्गलेश्वर भैरव आगच्छ आगच्छ सुगन्धि पुष्पदीपधूपान्नपिशितादिबलिं गृह्ण गृह्ण वौषट् । "वायव्ये" मङ्गलराजायनमः ॥ (उत्तरसे) ॥ भूपातालखदिक्षु प्रचारनिरता एकद्विपञ्चानना नानावर्णधराश्चतुर्द्विनवषड् दोर्दण्डहेत्यन्विताः । उग्रश्वाश्वसृगालवायसमुखीः कौवीरदिक्संस्थिता देवीः स्वामिभिरर्चये त्वनुगता भक्तार्तिविध्वंसिनीः ॥ ॐह्रींश्रींहसरक्षमलवयऊं योगिनीबलगण आगच्छ आगच्छ सुगन्धि पुष्पदीपधूपान्नपिशितादिबलिं गृह्ण गृह्ण वौषट् । "उत्तरे" योगिनी बलेभ्यो नमः ॥ (ईशानसे) ॥ श्यामवर्णं तु द्विभुजं विष्णोरनुचरं नुमः । उपवीतिनमीशाने विष्वक्सेनं महाबलम् ॥ ॐह्रींश्रीं विष्वक्सेन भैरव आगच्छ आगच्छ सुगन्धिपुष्पदीपधूपान्नव्यञ्जनादि बलिं गृह्ण गृह्ण वौषट् । "ईशाने" विष्व-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

क्सेनाय नमः ॥ (ऊपरसे) ॥ मङ्गलादित्यमदैन्यं नाना मङ्गलभूपितम् । जयक्सेनमहमूर्द्ध्वे वन्दे क्षेत्रेश्वरं विभुम् ॥ ॐ ह्रीं श्रींजयक्सेनभैरव रक्षरक्ष एहिएहि सुगन्धिपुष्पदीप-धूपान्नपिशिनादिबलिं गृह्ण गृह्ण वौंपट् । ऊर्द्ध्वे जयक्सेनाय नमः ॥ (नीचेसे) ॥ कपालमालाभरणमानन्दमदघूर्णितम् । कल्पान्तमेघसदृशं श्रीतेजेशं नमोस्त्वऽधः ॥ ॐ ह्रींश्रीं श्रीतेज भैरव आगच्छ आगच्छ नानाविधभक्ष्यभोज्यादिबलिं गृह्ण गृह्ण वौंपट् । "पाताले" तेजायनमः ॥ (बीचमें) ॥ मध्ये राष्ट्रपतिं दशार्धवदनं शून्यैकबाहुं महाप्रेतस्थं तिथि-लोचनं गणपतिं श्रीचण्डमष्टेष्टदम् । नानावर्णसुवर्णविग्रह-रुचिं खट्वाङ्गकाद्याङ्कुशं पाशासि स्फुरन्मुण्डशूलडमरू घण्टाधरं भावये ॥ ॐ ह्रींश्रींचण्ड भैरव आगच्छ आगच्छ सुगन्धि पुष्पदीपधूपान्नपिशितादिबलिं गृह्ण गृह्ण वौंपट् । "मध्ये" चण्डाय नमः ॥ (सबोंको) । क्षांक्षेत्रपतिभ्यो बलिंनमः । रांराष्ट्रपतिभ्यो बलिंनमः । सर्वे अभयवरप्रदा मह्यं पुष्टिं पुष्टिपतयो ददतु ॥ (बाद्दे जजूसे) ॥ अपसव्येन ॥ (अन्नकानों पर फूल लगाना) ॥ आयुः प्रजां धनं विद्यां स्वर्गमोक्षौ सुखानि च । प्रयच्छन्तु तथा राज्यं नृणां प्रीताः पितामहाः । १ । एष पिण्डो मया दत्तस्तव हस्ते जनार्दन । गयायां पितृरूपेण स्वयमेवोपगृह्यताम् । २ । आत्मनश्चार्थलाभाय क्षेमाय विजयाय च । शत्रूणां बुद्धिनाशाय पितृनुद्धरणाय च । ३ । पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिला । यत्र तत्र स्मरेन्नित्यं पितृणां दत्तमक्षयम् । इति वैश्वदेव-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

विधिः ॥ (दाहे जव्नू से) ॥ सव्येन । (दो दर्भकाण्ड अर्घयुक्त हाथ में रख के देवोंका रुकसथ देना) ॥ ॐभूः पुरुषं विसर्जयामिनमः ॐभुवः पुरुषं विसर्जयामिनमः ॐस्वः पुरुषं विसर्जयामिनमः ॐभूर्भुवःस्वःपुरुषं विसर्जयामिनमः ॥ ३ ॥ॐभूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ३ ॥ ॐह्रींश्रींदेवीपुत्राय विद्महे क्षेत्रेशमुख्याय धीमहि । तन्नो वटुकभैरवः प्रचोदयात् ॥ ३ ॥ ॐतत्सद्ब्रह्म अद्यतावत्तिथावद्यफाल्गुनमासस्य कृष्णपक्षस्य तिथावमुकायां अमुकवारान्वितायां महागणपतेः कुमारस्य श्रियः सरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वारदेवतानां प्रजापतेः ब्रह्मणः कलशदेवतानां ब्रह्मविष्णुमहेश्वरदेवतानां चातुर्वेदेश्वरस्य सानुचरस्य ऋतुपतेर्नारायणस्य "फाल्गुने" शक्तिसहितस्य चक्रिणः क्रियासहितस्य गोविन्दस्य दुर्गायाः त्र्यम्बकस्य वरुणस्य यज्ञपुरुषस्य अग्निष्वात्तादीनां पितृगणदेवतानां कालरात्र्याः तालरात्र्याः राज्ञिरात्र्याः शिवरात्र्याः "पूर्वे" देवीपुत्रवटुकनाथस्य "आग्नेये" भूतवलानां "दक्षिणे" अग्निवेतालराजस्य "नैर्ऋते" बहुखातकेश्वरस्य "पश्चिमे" स्थानक्षेत्रपालस्य "वायवे" मङ्गलराजस्य "उत्तरे" योगिनीवलानां "ईशाने" विश्वक्सेनस्य "ऊर्ध्वे" जयत्सेनस्य "पाताले" तेजस्य "मध्ये" चण्डस्य शिवरात्रीदेवतानां विष्णुपञ्चायतनदेवतानां अभयङ्करीदेव्याः क्षेमङ्करीभवान्याः सर्वशत्रुघातिन्याः इह राष्ट्राधिपतेः अमुकभैरवस्य आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं शिवरात्रीव्रतनिमित्तं कलशपूजनं शिवरात्रीयागपूज-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

नमऽच्छिद्रं सर्वमस्तु एवमस्तु ॥ (यवोदक छोडना) ॥
एताभ्यो देवताभ्यो यवोदकंनम उदकतर्पणंनमः ॥ (फूलों
से प्रार्थना करना) ॥ आज्ञा मे दीयतां नाथ नैवेद्यस्यास्य
भक्षणे । शरीरयात्रासिद्ध्यर्थं भगवन् क्षन्तुमर्हसि ॥ आपन्नोस्मि
शरण्योसि सर्वावस्थासु सर्वदा । भगवंस्त्वां प्रपन्नोस्मि रक्ष मां
शरणागतम् ॥ (कलश को) ॥ ईशानविष्णुकमलासनका-
र्तिकेयवह्नित्रयार्करजनीशगणेश्वराणाम् । क्रौञ्चामरेन्द्रकलशोद्भ-
वकश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ कलिकलु-
षविमुक्तैः पूजितः सिद्धसङ्घैरमरचमरमालावीजमानोऽप्सरोभिः ।
पितृशतमपि बन्धून्पुत्रपौत्रान्प्रपौत्रानपि नरकनिमग्नांस्ता-
रयेद्विष्णुरेव ॥ (स्तोत्रपाठादि कालानुसार पढकर) ॥
क्षमध्वं मम क्षेत्रेशा ददध्वं सुखसम्पदः । खगोपातालदिक्सं-
स्थास्तुष्टा यान्तु स्वकं पदम् ॥ आह्वानं नैव जानामि नैव
जानामि पूजनम् । पूजाभागं न जानामि क्षम्यतां परमे-
श्वर ॥ (अष्टाङ्ग प्रणाम देना) ॥ उभाभ्यां जानुभ्यां
पाणिभ्यां शिरसा चोरसा च वचसा च मनसा च नमस्कारं
करोमि नमः ॥ (तर्पण करना) ॥ नमो ब्रह्मणे नमो
अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे
नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि ॥ ३ ॥ इत्येता-
सामेव देवतानां सामीप्यं सार्ष्टितां सायुज्यं सलोकतामाप्नोति
य एवं विद्वान्स्वाध्यायमधीते ॥ (कलश ब्राह्मणहाथ
देकर स्वस्त्ययन का मार्जनउससे बन्धुसहित लेना) ॥
उदकलशमुपनिधाय स्वस्त्ययनं वाचयति ॥ उत्तिष्ठ ब्रह्मणस्पते-
देवयन्तस्त्वेमहि उपप्रयन्तु मारुतः सदानव इन्द्र प्राशूर्भवा-

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri


सचा, अर्यमाऽधातु वृषभस्तुविष्मान् यन्ता वसूनि विधर्त्ते तनूपाः, सहस्राक्षो गोत्रभिद्वज्रबाहुः, अस्मासु देवो द्रविणं ऽदातु, ये ते अर्यमन्बहवो देवयानाः पन्थानो राजन् दिव आचरन्ति, तेभिर्नो अद्य पथिभिः सुगेभीरक्षा च नो अधि च ब्रूहि देव ॥ "राष्ट्रभृतां देवानामार्षम्" । बोधश्च मा प्रतिबोधश्च पुरस्ताद्गोपायतामऽस्वप्नश्च माऽणवद्राणश्च दक्षिणतो गोपायतां गोपायमानश्च मा रक्षमानश्च पश्चाद्गोपायतां जागृविश्च माऽरु-न्धती चोत्तराद्गोपायताम् । अनमित्रं नो अधरागऽनमित्रमुद-कृधि, इन्द्रानमित्रं नः पश्चाद्ऽनमित्रं पुरस्कृधि । अनमित्रैरहोभिः सचेमहि विश्वेदेवा अनमित्रान उशसः सन्तु निम्रुचः । याः षड्डुर्वीः पञ्च प्रदिशस्ता नः पान्तु मित्रधानो मित्रे दधात अभयं नो अस्तु । ये रात्रीमनु तिष्ठथ ये च भूतेषु जागृथ पशून्ये सर्वान्रक्षत तेन आत्मा सुजागृत । बोधप्रतीबोधाऽस्वप्नानव-द्राणो गोपायमान रक्षमाण जागृवेऽरुन्धति ये देवास्तनूपाः स्थ ते म इह तन्वं पात बोधप्रतीबोधेत्यसौ वा आदित्यो बोधः प्रतीबोधोग्निः स्वप्नानवद्राणेति चन्द्रमा वा अस्वप्नोयं य्यः पवते सोणवद्राणो गोपायमान रक्षमाणेत्यहर्वै गोपायमानो रात्री रक्षमाणो जागृवेरुन्धतीति यज्ञो वै दक्षिणारुन्धत्येते वै देवा राष्ट्रभृतस्तानेवेट्ठे आत्मनो गोपीथाय ॥ (यजमानों को अक्षोट सहित फूलदेना) मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोस्तु मित्राणामुदय-स्तव । मार्कण्डेयमुनेः स्वर्गवैद्ययोः स्वर्पतेर्यथा । आयुरारोग्य-मैश्वर्यमेतत्त्रितयमस्तु ते । जीव त्वं शरदः शतम् ॥

इति शिवरात्रौ वटुकपूजा सम्पूर्णा ॥

CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri

ॐअथ द्वादश्यां पूज्यानां भैरवानां नामानि ॥ (वागुर-द्वादशीमें पूजाके विषय भैरव लिखते हैं ।) "पूर्वे" हेरुकाय "अग्नये" त्रिपुरान्तकाय "दक्षिणे" वेतालाय "नैऋते" अग्निजिह्वाय "पश्चिमे" करालाय "वायवे" कामाख्याय "उत्तरे" एकपादाय "ईशाने" भीमरूपिणे "ऊर्ध्वे" तारकाक्ष्याय "पाताले" हाटकेश्वराय "मध्ये" राजराजेश्वराय ॥ (इन हेरकादिक नामों से द्वादशीकी दिन कलशपर या और वागुरनाम बरतन रख के कुलाचारसे पूजा करना) ॐपुष्पाणि सन्तु तव देव मदिन्द्रियाणि धूपोगुरुर्वपुरिदं हृदयं प्रदीपः । प्राणा हवींषि करणानि नवाक्षतास्ते पूजाफलं व्रजतु साम्प्रतमेष जीवः ॥ १ ॥ वाञ्छामि नाहमपि सर्वरसाधिपत्यं नेच्छे पुरन्दरपुरं न पुरं विधातुः । भूयो भवामि यदि जन्मनि जन्मनि स्वां त्वत्पादपङ्कजलसन्मकरन्दभृङ्गः ॥ २ ॥ जन्मानि सन्तु मम देव शताधिकानि माया च मे विशतु चित्तमबोधहेतुः । किञ्च क्षणार्धमपि त्वच्चरणारविन्दान्माऽपैतु मे हृदयमीश! नमो नमस्ते ॥ ३ ॥

इति द्वादशीपूजाविधिः ॥



CC-0 Manuscripts from A.K. Razdan Sahib's Collection. Digitized by eGangotri